विश्वविद्यालयात् उपाधिगृहीतेभ्यः छात्रेभ्यः विविधक्षेत्रेषु जीविकोपलब्धयः भवन्ति, यथसैन्य-पत्रकारिकता-पशासन-अध्यापन-प्रवचन-कर्मकाण्ड-पौरोहित्यादि क्षेत्रेषुसंस्थापितानां संस्थानां पक्षतः तेषां प्रतिपुष्टयः कार्यशैलीविवरणञ्च संगृह्यते। सैन्यक्षेत्रे धर्मगुरू इति पदे अस्य विश्वविद्यालस्य उपाधिधारकः छात्राः नियोजिताः भवन्ति । यदाकदासैन्याधिकारिभः शास्त्रि-उपाधिविषये आपत्तिः कृता, विश्वविद्यालयस्तरे कुलपति-कुलसचिवस्तरे च बहुधा पत्राणि लिखितानि, ततः समस्या निवारिता येनविश्वविद्यालीयच्छात्राणां तत्र सेवायां नियोजनमपि जातम् ।

| File Description | Document |
|---|---|
| Upload the Minutes of the Academic Council/ Executive Council etc. विद्वद्परिषदादीनां निर्णयान् उपारोपयतु | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/1. |

## 2.Teaching-learning and Evaluation

### 2.1 Student Enrollment and Profile

***2.1.1 Average percentage of students from other States and Countries during the last five years***

***विगतेषु पञ्चसु वर्षेषु अन्येभ्यः राज्येभ्यः राष्ट्रेभ्यश्च प्रविष्टानां छात्राणां मध्यमानस्य प्रतिशततायाः मानम्।***

**Answer:** 68.9

2.1.1.1 Number of students from other states and Countries, year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु अन्येभ्यः राज्येभ्यः राष्ट्रेभ्यश्च प्रविष्टानां छात्राणां वार्षिकसङ्ख्या।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 1501 | 1498 | 1312 | 1512 | 1601 |

| File Description | Document |
|---|---|
| List of students (other states and countries) छात्रसूची (अन्येभ्यः राज्येभ्यः/ राष्ट्रेभ्यश्च) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSI |
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSI |
| Copy of the domicile certificate/passport from respective countries) अधिवासप्रमाणपत्रम् / आज्ञापत्रम् (सम्बद्धदेशानां) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSI |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSI |

***2.1.2 Demand Ratio (Average of last five years)***

***अभियाचनायाः अनुपातः (विगतानां पञ्चानां वर्षाणां मध्यमानम्)***

**Answer:** 37.9

2.1.2.1 Number of eligible applications received for admissions to all the Programmes year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु प्रचालितेषु सर्वेषु कार्यक्रमेषु प्राप्तार्हतानाम् आवेदनपत्राणां वार्षिकक्रमेण सम्पूर्णा सङ्ख्या

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 2204 | 2226 | 1917 | 2675 | 1903 |

2.1.2.2 Number of seats available year-wise during the last five years.

विगतेषु पञ्चसु वर्षेषु प्रतिवर्षम् उपलब्धानां स्थानानां सङ्ख्या।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 5958 | 5718 | 5718 | 5718 | 5718 |

| File Description | Document |
|---|---|
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSF |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSF |

***2.1.3 Average percentage of seats filled against seats reserved for various categories (SC, ST, OBC, Divyangjan, etc.) as per applicable reservation policy during the last five years***

***विगतेषु पञ्चसु वर्षेषु, आरक्षणनीत्यनुसारेण, नानाप्रवर्गेभ्यः (अनुसूचितजातिः, अनुसूचितजनजातिः, अन्य-अप्रगतजातिः, दिव्याङ्गजनाः, इत्यादयः) निर्दिष्टेषु आरक्षितस्थानेषु, सम्पूरितानाम् आरक्षितस्थानानां प्रतिशतं मध्यमानस्य प्रतिशतता।***

**Answer:** 4.38

2.1.3.1 Number of actual students admitted from the reserved categories year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु प्रतिवर्षम् आरक्षितप्रवर्गेभ्यः प्राप्तप्रवेशानां छात्राणां सङ्ख्या।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 162 | 162 | 148 | 119 | 166 |

2.1.3.2 Number of seats earmarked for reserved category as per GOI/State Govt. rule year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु भारतशासनस्य अथवा राज्यशासनस्य नियमानुरूपम् आरक्षितप्रवर्गेभ्यः निर्दिष्टानां स्थानानां वार्षिकी सङ्ख्या

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 3574 | 3430 | 3430 | 3430 | 3430 |

| File Description | Document |
|---|---|
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSF |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSF |

## 2.2 Catering to Student Diversity

***2.2.1 The institution assesses the learning levels of the students, after admission and organises special programmes (including spoken Sanskrit shibirams/ camps/ workshops/ summer schools etc.) for advanced learners and slow learners***

***छात्राणां प्रवेशानन्तरं संस्था तेषाम् अधिगमस्तरान् परीक्षते, अग्रसराधिगन्तॄणां मन्दाधिगन्तॄणां च कृते विशिष्टान् शैक्षिकपाठ्यक्रमान् (संस्कृतसम्भाषणशिबिराणि/ आवासीयशिबिराणि/ कार्यशालाः/ ग्रीष्मकालिकशिबिराणि इत्यादि) आयोजयति।***

**Answer:**

विश्वविद्यालय: छात्राणां प्रवेशात्परं तेषाम् अधिगमस्तरं निरीक्षते अपि च प्रगताध्येतृणां मन्दाध्येतृणा च कृते विशिष्टान् कार्यक्रमान् च आयोजयति। अत्र प्रगताध्येतृणां मन्दाध्येतृणा छात्राणां अधोदत्तां प्रक्रियां आधारीकृत्य योग्यतानिर्धारणं क्रियते -

1. शास्त्रि-आचार्यकक्षासु नामाङ्कितानां छात्राणाम् पूर्वकक्षासु गृहीतपरीक्षाया: परिणामस्य आधारेण योग्यतानिर्धारणं विधीयते। तत्र 48% प्राप्तांका: सामान्यछात्रेषु गण्यन्ते।
2. प्रवेशपरामर्शकाले एव छात्राणाम् उन्नतयोग्यताया: सामान्ययोग्यतायाश्च निर्धारणम् आकलनं वा वाक्परीक्षाधारेण (काउसिलिंग) क्रियते।
3. इकाईपरीक्षणेन विशेषबोधत्वं सामान्यबोधत्वञ्च निर्णीयते।
4. शास्त्रिद्वितीयतृतीयवर्षे आचार्यप्रथम-द्वितीय-तृतीयाधिसत्रे विश्वविद्यालयस्तरीयमूल्याङ्कनेन सह तेषां छात्राणां बौद्धिकस्तरस्य सत्रान्तपरीक्षाया: परिणामस्य आधारेण निर्धारणं भवति।

प्रविष्टानां छात्राणां योग्यतानिर्धारणान्ते साधारणछात्राणां असाधारणछात्राणां चकृते अधिगमस्तरं वर्धयितुं नैके विशिष्टा: कार्यक्रमा: विश्वविद्यालयद्वारा समायोज्यन्ते। यथा –

**मन्दाध्येतृणा छात्राणां कृते क्रियमाणा: प्रकल्पा:-**

1. पृथक्कक्षाग्रहणम्
2. सरलमानकसंस्कृतप्रयोग:
3. पूर्वाभ्यास:
4. दत्तकार्यम्
5. संवादावसर:

**पृथक्कक्षाग्रहणम्** – अध्यापका: सामान्यछात्रेभ्य: अतिरिक्तसमयं दत्त्वा विभागे गृहे च पाठयन्ति।

**सरलमानकसंस्कृतप्रयोग:** - सामान्यछात्रा: शास्त्रीयकठिनविषयं पारिभाषिकशब्दै: अधिगन्तुं समर्था: न भवन्ति तस्मात् सरलसरलशब्दान् (सन्धि-समासान् शिथिलीकृत्य) प्रयुज्यते।

**पूर्वाभ्यास: -** सामान्यछात्रेभ्य: विषयाणां बोधाय अध्यापनकाले पुनरभ्यासस्य महत्त्वं प्रदीयते।

**दत्तकार्यम् -** अध्यापकैः अध्यापनकाले विशेषरूपेण सामान्यछात्रेभ्य: विषयबोधाय गृहकार्यमपि पाठ्यक्रमान् अनुसृत्य प्रदीयते तथा च प्रदत्तकार्यस्य निरीक्षणमपि अध्यापनकाले क्रियते।

**संवादावसर: -** सामान्यछात्रेभ्य: वाग्वर्धनाय परस्परं सम्भाषणकार्यस्य महत्त्वं प्रदीयते। प्राय: छात्रा: प्रगतछात्रै: सह संवादं कुर्यु: तदर्थम् अध्यापवैâ: कक्षायां वातावरणं निर्मीयते।

**प्रगताध्येतॄणां छात्राणां कृते क्रियमाणा: प्रकल्पा:–**

1. वाग्वर्धिनीपरिषद्
2. शास्त्रप्रौढि:
3. श्रुतिनि:स्वन:
4. शास्त्रीयव्याख्यानमाला

**वाग्वर्धिनीपरिषद् –** प्रत्येकं विभागे प्रगताध्येतॄणां छात्राणां कृते वाग्वर्धिनीपरिषदोऽपि आयोजनं भवति यत्र प्रदत्तं कञ्चिद् विषयमाश्रित्य छात्रा: व्याख्यानं ददति येन तेषां भाषणकौशलं वर्धते। अत्र परिषदि स्वानुभववर्धनार्थं मन्दाध्येतार: छात्रा: अपि उपस्थिता: भवन्ति।

**शास्त्रप्रौढि: -** संस्कृतवाङ्मये शास्त्राणि प्रौढानि अपि भवन्ति यानि कानिचित् विषयज्ञान् विदुषो विना नावगन्तुं शक्यन्ते। अत: प्रगताध्येतॄणां छात्राणां कृते 'शास्त्रप्रौढि:' कार्यक्रमोऽपि अन्तर्जालमाध्यमेन विश्वविद्यालयेन सञ्चाल्यते। तत्र तत्तविषयविशेषज्ञा: प्रौढानि शास्त्राणि सरलीकृत्य बोधयन्ति येन छात्रा: तत्सम्यगवबोधने समर्था: भवन्ति।

**श्रुतिनि:स्वन: -** अस्य कार्यक्रमस्य माध्यमेन वेदविषयकाणि विशिष्टानि व्याख्यानानि देशस्य विशिष्टै: आचार्यै: कार्यन्ते येन प्रगताध्येतारश्छात्रा: विशेषेण लाभान्विता: भवन्ति।

**शास्त्रीयव्याख्यानमाला –** शास्त्रीयव्याख्यानमालामाध्यमेन नैकानि विशिष्टानि व्याख्यानानि विश्वविद्यालयेन कार्यन्ते। येन तान् विषयान् ज्ञात्वा प्रगताध्येतार: विशेषण लाभान्विता: भवन्ति।

**उभयविधछात्राणां कृते क्रियमाणा: प्रकल्पा: –**

**भ्रमणकार्यक्रम: -** छात्रेभ्य: छात्राभ्यश्च भौगोलिकज्ञानसंवर्धनाय प्रत्यक्षविधिना वस्तुबोधनाय विश्वविद्यालयोऽयं शैक्षिकभ्रमणकार्यक्रमान् समायोजयति।

**गुरुकुलम् –** गुरुकुलपद्धतिरिव विश्वविद्यालयस्य छात्रा: अध्यापकाश्च अध्ययनाध्यापनं कुर्वन्ति। अत्रत्या: छात्रा: अध्यापकाश्च प्रायश: सन्ध्यावन्दनं कुर्वन्त्येव। ग्रन्थारम्भे मङ्गलवाक्यं समाचर्य्य ग्रन्थान् आरभन्ते। अत्र छात्रा: गुरून् समर्पणभावेन नमस्कुर्वन्ति। अध्यापका अपि शिष्यान् पुत्रान् मत्वा पाठयन्ति। विश्वविद्यालये अनेकानि मन्दिराणि वर्त्तन्ते तत्र गत्वा गुरुकुलमिव प्रार्थनां कुर्वन्ति।

**संस्कृतसंभाषणशिविरम् –** सर्वेषां सर्वासाञ्च मुखे संस्कृतं भवेत् इति प्रयोजनं समुद्दिश्य विश्वविद्यालयस्य विविधविभागेषु संस्कृतसंभाषणशिविराणि समायोज्यन्ते। समायोजितेषु शिविरेषु अध्यापका: सरलमानकपद्धत्या संस्कृतसंभाषणशिक्षणं कारयन्ति। तत्र साधारणछात्रेभ्य असाधारणछात्रेभ्यश्च परिवेशीयवस्तूनि प्रदर्श्य संस्कृतशब्दै: शिक्षणं कारयन्ति। तस्मात् सुगमतया छात्रा: संस्कृतसम्भाषणे दक्षा: भवन्ति।

**कार्यशाला:-**विश्वविद्यालयोऽयं स्वस्तरेण अपरसंस्थासहयोगेन च कार्यशालाया: समायोजनं करोति। कार्यशालायाम् अत्रत्या: छात्रा: अध्यापका: अन्यसंस्थाभ्य: समागता: छात्रा: अध्यापकाश्च भागं गृह्णन्ति। कार्यशालायां विषयविशेषं स्वीकृत्य चर्चा प्रचलतीति।

**विज्ञानप्रंशसा –** अत्रत्या: अध्यापका: विश्वविद्यालय-प्रविष्टान् छात्रान् शास्त्रीयज्ञानपद्धत्या सह वैज्ञानिकतत्त्वानि अपि पाठयन्ति तदर्थं प्रेरयन्ति च। वैज्ञानिकज्ञानविवर्धनाय वानस्पतिकक्षेत्रभ्रमणमपि छात्रा: कुर्वन्ति। तत्र विश्वविद्यालयस्य विज्ञानविभागीया: अध्यापका: शास्त्रपाठ्यक्रमस्य अध्यापकाश्च शिष्येभ्य: वैज्ञानिकतथ्यं स्वरूपं वैशिष्ट्यं उपयोगितां च समुद्बोधयन्ति।

**कर्मकाण्डकार्यक्रमा:-**अस्मिन् विश्वविद्यालये कर्मकाण्डकार्यक्रमा: छात्रै: समायोज्यन्ते। कर्मकाण्डकार्यक्रमेषु यज्ञानां सम्पादनं प्रत्यक्षविधिना विधीयते। यज्ञस्य उद्देश्यं सार्वभौमं विश्वकल्याणं भवति। कोरोनाकाले जना: त्रस्ता: आसन्। तस्मिन् काले कर्मकाण्डविधिम् आश्रित्य जनपदस्तरीयाधिकारिभि: सह विश्वविद्यालयस्य वेदविभागे छात्रै: अध्यापकैश्च अनेके यज्ञा: सम्पादिता:। छात्रा: अध्यापकाश्च विश्वविद्यालयस्थापनादिवसं शिवरात्रिं वसन्तपञ्चमीं श्रावणीउपाकर्म प्रभृतिं समभिलक्ष्य यज्ञान् सम्पादयन्ति।

**संवादकार्यशाला (मौखिकी लिखिता च)**–छात्राणां हिताय अयं विश्वविद्यालय: यथावसरं मौखिकी: लिखिताश्च संवादकार्यशाला: अपि आयोजयति।

**सांस्कृतिकसङ्ग्रहालययात्रा –** अत्रत्या: छात्रा: अध्यापकै: सह सांस्कृतिकसङ्ग्रहालयं प्रतियात्रां कृत्वा प्राच्यवस्तुन: अभिज्ञानं कुर्वन्ति।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/2. |
| Provide link for additional information अतिरिक्तसूचनानां सन्धानम् | View Document (https://ssvv.ac.in/download/C2-L/2.2.1%20Video.pdf) |

***2.2.2 Student - Full time teacher ratio***

***छात्राणां पूर्णकालिकाध्यापकानां च अनुपातः***

**Answer:** 21.4

| File Description | Document |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/2.2.2 |

| Other Upload Files | |
|---|---|
| 1 | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/2.2.2_1721718 |

**2.3 Teaching- Learning Process**

***2.3.1 Student centric methods, such as experiential learning, participative learning and learning through dialogue mode and use of hermeneutics in the teaching of knowledge texts and Kavyas, problem solving methodologies are used for enhancing learning experiences.***

***अनुभवात्मकः अधिगमः, सहभागी अधिगमः, संवादपद्धत्या अधिगमः इत्यादयः छात्रकेन्द्रितविधयः, वादपद्धत्या शिक्षणं, शास्त्राणां काव्यानां च पाठने टीकाभाष्यादिपद्धतयः समस्यापरिष्कारविधिविज्ञानानि च अधिगमानुभवसमभिवर्धनाय उपयुज्यन्ते।***

**Answer:**

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये अनुभवात्मकः अधिगमः, सहभागी अधिगमः, संवादपद्धत्या अधिगमः इत्यादयः छात्रकेन्द्रितविधयः, वादपद्धत्या शिक्षणं, शास्त्राणां काव्यानां च पाठने टीकाभाष्यादिपद्धतयः समस्यापरिष्कारविधिविज्ञानानि च अधिगमानुभवसमभिवर्धनाय उपयुज्यन्ते।

छात्रेषु केचन प्रगतछात्राः केचन सामान्यबुद्धिमन्तः छात्राः भवन्ति। अतः शिक्षणप्रविधिषु छात्राणाम् अर्हतां समाकलय्य शिक्षणप्रविधिद्वारा अध्यापकाः शास्त्राणि पाठयन्ति। उभयविधछात्रकेन्द्रिताः विधयः प्रकल्पाश्च अधोदत्ताः वर्त्तन्ते –

**अनुभवात्मकं शिक्षणम् –** छात्रकेन्द्रिताध्यापनप्रकल्पेषु अनुभवात्मकशिक्षणप्रकल्पः महत्वपूर्णो भवति। तस्मात् अत्रत्याः अध्यापकाः अनुभवात्मकशिक्षणविधिना शास्त्रं छात्रान् पाठयन्ति। साहित्यविभागे नाट्यशालायां नाटकादिमाध्यमेन अनुभूतविषयान् विस्फोरयन्ति। क्रमेऽस्मिन् विश्वविद्यालयस्थितायां नाट्यशालायाम् अभिज्ञानशाकुन्तलनाटकमाध्यमेन अनुभूतविषयाणाम् अभिज्ञानं विश्वविद्यालयेन विहितमस्ति। वेदविभागे यज्ञादिमाध्यमेन वेदप्रथितयज्ञविधीनाम् अभिज्ञानं वैदिकछात्रैः क्रियते। व्याकरणविभागे अध्यापकाः वर्णोच्चारणस्याभिज्ञानं वर्णोच्चारणं विधाय कारयन्ति। मुखे जिह्वादीनां स्पर्शः केषु केषु अङ्गेषु भवति इति अनुभवद्वारा वर्णोत्पत्तिस्थानस्य परिचयः छात्रैः अध्यापकसहयोगेन क्रियते। ज्योतिषविभागे हस्तरेखाकुण्डल्यादिनिर्माणं तथा च राशिफलादिकथनम् अनुभवाधारितं भवति तत्सर्वं ज्योतिषविभागीयाध्यापकैः छात्रैश्च क्रियते। तथा च विशेषरूपेण ज्योतिषविभागे सञ्चालितेन 'ज्योतिष एवं वास्तु परामर्श केन्द्र' माध्यमेन अध्यापकाः छात्राश्च अनुभवात्मकज्ञानेन फलादेशं कुर्वन्ति। स्वच्छीकरणकार्यक्रमाः अपि अत्र आयोज्यन्ते तेन कार्यक्रमेण परिशोधितं प्रफुल्लितं चेतः स्वस्थशरीरम् इत्यादिकम् अनुभवन्ति छात्राः अध्यापकाश्च एवं छात्राणां ज्ञानवृद्धये अनुभवात्मकशिक्षणप्रकल्पः अत्रत्यैः अध्यापकैः शिक्षणप्रसङ्गे उपयुज्यते।

**सहभागी शिक्षणम् –** प्रकल्पेऽस्मिन् अध्यापकसहयोगेन छात्राः परस्परं विद्यायाः आदानप्रदानं कुर्वन्ति तदर्थं सूत्रान्त्याक्षरी, श्लोकान्त्याक्षरी, वाग्वर्धिनीसभा, प्रभृतीनाम् आयोजनं विधाय ज्ञानस्य परस्परम् आदानप्रदानं छात्रैः विधीयते। वेद-विभागीयाः छात्राः मन्त्राणामभ्यासं वेदिकादिकं निर्मीय कुर्वन्ति। विश्वविद्यालयस्य परिसरे अनेकानि मन्दिराणि सन्ति तत्रापि अवसरानुगुणं रक्षाबन्धनदिवसे श्रावणी-उपाकर्मणि छात्राः अध्यापकाश्च सम्भूय संबद्धकर्मकाण्डानुष्ठानं कुर्वन्ति। एतेन सहभागिविधिना विद्यायाः अभ्यासः सञ्जायते। विश्वविद्यालयात् बहिरपि गत्वा छात्राः सम्भूय सायंकालीने गंगारतीक्ये कार्यक्रमे भागं गृहीत्वा ज्ञानाधिगमं कुर्वन्ति। शैक्षिकभ्रमणकाले सांस्कृतिकपर्यटने च छात्राः नूतनवस्तु अवलोक्य ज्ञानवर्धने सहभागित्वं योजयन्ति।

**संवादद्वारा शिक्षणम् –** शास्त्रीयविषयस्य अध्ययनाध्यापने संवादशिक्षणपद्धतिः छात्रेभ्यः उत्तमा भवति। अध्यापकशिष्याः परस्परं, छात्राः छात्रैश्च संवादद्वारा विद्याग्रहणं प्रमुखरूपेण कुर्वन्ति। अस्मिन् शिक्षणविधौ नाटकसंवादद्वारा श्रोतृरूपेण साहित्यविद्या मानवीयपक्षान् भारतीयप्राच्यविद्यां च प्रत्यक्षविधिना अधिगच्छन्ति। शास्त्रार्थे संवादस्य विशेषमहत्वं भवति। तत्र केचन छात्राः प्रथमतया पूर्वपक्षमुपस्थापयन्ति ततः केचन छात्राः उत्तरपक्षम्। एवङ्कृत्वा शास्त्रस्यगूढार्थज्ञानं प्राप्नुवन्ति। मन्दाध्येतारः छात्राः संवादपद्धतौ विशेषरूपेण लाभान्विताः भवन्ति। तत्र कठिनोऽपि विषयः पौनःपुन्येन समुच्चार्यते येन विषयस्य सारल्यं भवति। न केवलं शास्त्रार्थपरम्परायाम् अपितु कक्षाध्यापनकालेऽपि छात्रैः प्रश्नाः पृच्छ्यन्ते अन्य छात्रैश्च उत्तराणि प्रदीयन्ते। एवं कक्षायां संवादक्रमः सञ्जायते। संवादक्रमे अभिज्ञानशाकुन्तलनाटकादिमाध्यमेन पात्ररूपेण छात्राः संवादं स्थापयन्तः नाटकसम्बद्धक्रियाकलापं कुर्वन्तश्च सहभागित्वं भजन्ते।

**काव्यशास्त्राधिगमे टीकाभाष्यपद्धतिः -** शास्त्रीयपक्षं मानवीयपक्षं व्यवहारपक्षं सहजतया अधिगच्छन्ति। शास्त्राणि काव्यानि च सूत्ररूपेण भवन्ति। तस्मात् अध्ययनेऽध्यापने च काठिन्यं समायाति। तत्र सारल्येन अधिगमः भवेत् तदर्थं टीकाभाष्यपद्धतिः उपयुज्यते। टीकापद्धतौ सूत्रात्मकस्य शास्त्रस्य काव्यस्य च अर्थावबोधे सौख्यमवाप्यते तस्मात् टीकया टीकनं शास्त्रप्रकाशनम् अध्यापकैः छात्रेभ्यः क्रियते। प्रायः प्रतिप्रकरणं विषयानुगुणं पाठ्यक्रमे टीका समुपलभ्यते। पाठ्यक्रमरूपेण बहुषु विषयेषु टीका स्वीकृताः सन्ति। काव्यानां शास्त्राणां च पूर्वपक्षं समुपस्थाप्य पुनश्च उत्तरपक्षद्वारा सिद्धान्तप्रदर्शनं भाष्यपद्धतिरुच्यते। प्रस्तुतपद्धतेः सर्वेषु शास्त्रीयविषयेषु उपयोग क्रियत एव।

**समस्यासमाधानपद्धतिः-**विश्वविद्यालयेऽस्मिन् शास्त्रीयज्ञानोद्बोधनाय अध्यापकसहयोगेन छात्रद्वारा समस्याः आविष्क्रियन्ते तदनुगुणं समाधानानि विधीयन्ते। विशेषरूपेण काव्यग्रन्थाध्यापने समस्यासम्पूर्तिः इति विषयमादाय छात्राः पाठ्यन्ते। श्लोकवाचने कस्यचित् वर्णस्य लोपं कृत्वा अथवा वर्णाधिक्यं कृत्वा समस्याः समुत्पाद्यन्ते पुनश्च पृच्छ्यते तत्र लोपवर्णः कः? आगतवर्णः कः? इति कृत्वा समाधानं दीयते। पुनश्च अनेकार्थकपदं समुच्चार्य वाक्ये कस्य अर्थस्य उपयोगिता इति समस्या उद्भाव्यते समाधानं च अध्यापकसहयोगेन छात्रैः क्रियते। विश्वविद्यालयद्वारा शतावधानम् अष्टावधानं कार्यक्रमः क्रियते तत्र अनेकजनैः एकस्मिन्नेव काले श्लोकनिर्माणप्रसङ्गे समस्याः समुद्भाव्यन्ते। एकेनैव जनेन सर्वासां समस्यानां समाधानं क्रियते। एवं विधिना समस्यासम्पूर्तिविषये अत्रत्याः छात्राः दक्षाः भवन्ति।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्तसूचनानां कृते सन्धानम् | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/2. |
| Link for Additional Information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document (https://ssvv.ac.in/download/C2-L/2.3.1%20Video.pdf) |

***2.3.2 Percentage of teachers using ICT for effective teaching with Learning Management Systems (LMS), E-learning resources etc.***

***अधिगम-प्रबन्धन-प्रणाली(अ.प्र.प्र)-वैद्युत-अधिगम-संसाधन(वै.अ.स)-प्रभृतिभिः सह सूचना-संप्रेषण-प्राविधिकीं (सू.सं.प्रा) प्रभाविशिक्षणार्थम् उपयुञ्जताम् अध्यापकानां प्रतिशतता।***

**Answer:** 100

2.3.2.1 Number of teachers using ICT

सूचना-सम्प्रेषण-प्राविधिकीम् (सू.सं.प्रा) उपयुञ्जताम् अध्यापकानां सङ्ख्या

Answer: 103

| File Description | Document |
|---|---|
| Upload List of teachers (using ICT for teaching) based on Data Template दत्तांशप्रारूपाधारेण सूचना-संप्रेषण-प्राविधिकी (सू.सं.प्रा) (अ.प्र.प्र., वै.अ.सं) उपयुञ्जताम् अध्यापकानां सूची उपारोपणीया | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/2 |
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/2 |

| | |
|---|---|
| Provide link for webpage describing the " LMS/ Academic management system" जालपुटस्य सन्धानं दीयतां यत्र अधिगम-प्रबन्धन-प्रणाली (अ.प्र.प्र) वैद्युत-अधिगम-संसाधनानां (वै.अ.स) विवरणं लभ्यते | View Document (https://ssvv.ac.in/download/C2-L/2.3.2%20Video.pd |

***2.3.3 Ratio of mentor to students for academic and stress related issues (preceding academic year data)***

***शैक्षिकसमस्याविषये, उद्वेगविषये च छात्राणां कृते उपलब्धानाम् उपदेष्टृणाम् अनुपातः (प्रगतवर्षस्य दत्तांशः)***

**Answer:** 25.93

2.3.3.1 Number of mentors

मार्गदर्शकानां सङ्ख्या

Answer: 85

| File Description | Document |
|---|---|
| Upload year-wise list of number of students, full time teachers and mentor/mentee ratio <br> छात्राणां तथा पूर्णकालिकाध्यापकानां वार्षिकी सूची तथा उपदेष्टृ-उपदेश्यानामनुपातश्च उपारोपणीयः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/10300 |

***2.3.4 University encourages the Grurukula method of teaching/ Pathashalas/ Traditional Oriental Learning System (TOLS)/ Gurukula/ Shastrapeethas***

***विश्वविद्यालयः गुरुकुलपद्धत्या अध्यापनं/ पाठशालाः/ परम्परागतप्राच्याधिगमप्रणालीः/ गुरुकुलानि/ शास्त्रार्थपीठानि च पोषयति।***

**Answer:**

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः गुरुकुलपद्धत्या अध्यापनं / पाठशाला: / परम्परागतप्राच्यायधिगमप्रणाली: गुरुकुलानि / शास्त्रार्थपीठानि / संस्कृतविद्यां संस्कृतज्ञानपरम्परां च आश्रित्य अन्तश्शास्त्रीयानुसन्धानानि प्रोत्साहयति। विश्वविद्यालयस्य सर्वेऽपि पाठ्यक्रमा: अनुसन्धानविषयस्य विस्तारका: विद्यन्ते। अयं विश्वविद्यालय: आधुनिक्या अध्यापनपद्धत्या सह गुरुकुलपद्धतिम् अपि समाश्रयति। अस्मिन् विश्वविद्यालये शास्त्राणाम् अध्ययनम् अध्यापनञ्च परम्परागतया प्राच्याधिगमपद्धत्या विधीयते। केषाञ्चित् विषयाणां सम्यक् ज्ञानार्थं तेषां प्रायोगिकस्य ज्ञानस्य आवश्यकता भवति। अत: विश्वविद्यालयेन तादृशी अपि व्यवस्था प्रकल्पिता वर्तते येन छात्रा: विषयस्य प्रयोगद्वारा सम्यगवबोधं कुर्यु:। यथा ज्योतिषशास्त्रस्य प्रायोगिकं ज्ञानं प्राप्तुं वेधशालाया: वेधयन्त्रालयस्य च व्यवस्थ वर्तते। मीमांसाया: यज्ञप्रकरणमाश्रित्य प्रायोगिकं विधिं कर्तुं वेदविभागे यज्ञशालाया: व्यवस्था विद्यते। एवं हि साहित्यविभागेऽपि संगीतस्य ज्ञानं कर्तुं संगीतोपकरणानां व्यवस्था वर्त्तते। विश्वविद्यालयस्य पाठ्यक्रमेषु पाठ्यमाना: शास्त्रीया: विषया: इमे सन्ति –

| | | | |
|---|---|---|---|
| 1. | ऋग्वेद: | 20. | शांकरवेदान्त: |
| 2. | शुक्लयजुर्वेद: | 21. | रामानुजवेदान्त: |
| 3. | कृष्णयजुर्वेद: | 22. | मध्ववेदान्त: |
| 4. | सामवेद: | 23. | निम्बार्कवेदान्त: |
| 5. | अथर्ववेद: | 24. | गौडीयवेदान्त: |
| 6. | वेदनैरूक्तप्रक्रिया | 25. | वल्लभवेदान्त: |
| 7. | पौरोहित्यम् | 26. | रामानन्दवेदान्त: |
| 8. | नव्यव्याकरणम् | 27. | शक्तिविशिष्टाद्वैतवेदान्त: |
| 9. | प्राचीनव्याकरणम् | 28. | दर्शनम् |
| 10. | गणितम् | 29. | तुलनात्मकधर्मम् |
| 11. | फलितज्यौतिषम् | 30. | तुलनात्मकदर्शनम् |
| 12. | सिद्धान्तज्यौतिषम् | 31. | सांख्ययोगम् |
| 13. | धर्मशास्त्रम् | 32. | आगम: |
| 14. | साहित्यम् | 33. | योगतन्त्रम् |
| 15. | पुराणेतिहास: | 34. | बौद्धदर्शनम् |
| 16. | प्राचीनराजशास्त्रार्थशास्त्रम् | 35. | जैनदर्शनम् |
| 17. | प्राचीनन्यायवैशेषिकम् | 36. | प्राकृत एवं जैनागम: |
| 18. | नव्यन्याय: | 37 | पालि |
| 19. | पूर्वमीमांसा | 38. | संस्कृतविद्या |

एतेषां पाठ्यक्रमाणां निर्दिष्टेषु शास्त्रीयेषु विषयेषु अन्त:शास्त्रीया: विषया: अपि बहव: सन्ति। अत: एषु विषयेषु अन्त: शास्त्रीयं विषयमाश्रित्य कृतस्य शोधकार्यस्य किञ्चिद्विवरणमत्र प्रस्तूयते –

1. धर्मशास्त्रविभागस्य शोधच्छात्र: प्रिंसशर्मा वेदविभागस्य सहायकाचार्यस्य डॉ. विजयकुमारशर्मणो निर्देशने 'धर्मशास्त्रदृष्ट्या गीताया: परिशीलनम्' इति विषयं स्वीकृत्य २०२२ तमे ख्रीष्टाब्दे शोधकार्यम् अकरोत्।
2. धर्मशास्त्रविभागस्य अनुसन्धाता प्रशान्तशेखरमिश्र: वेदविभागस्य डॉ. विजयकुमारशर्मणो निर्देशने 'वैदिकधर्मे सम्प्रदायप्रबोधिनीशिक्षाया उच्चारणपरम्परानुशीलनम्' इति विषयम्

आश्रित्य, २०२३तमे ख्रीष्टाब्दे स्वीयं शोधकार्यं कृतवान्।

3. धर्मशास्त्रविभागस्य शोधार्थी अशोककुमारपाण्डेयः वेदविभागस्य डॉ. सत्येन्द्रकुमारयादवस्य निर्देशकत्वे 'मनुस्मृतेः भारतीयसंविधानस्य च व्यवहारस्वरूपसमीक्षणम्' इति विषयमादाय २०१७ तमे ख्रीष्टाब्दे स्वकीयं शोधकार्यमकरोत्।
4. धर्मशास्त्रविभागस्य शोधच्छात्रः पशुपतिनाथमिश्रः वेदविभागस्य डॉ. सत्येन्द्रकुमारयादवस्य निर्देशने मनुस्मृतिगततिङन्तपदसमीक्षणम्' इति विषयं समाश्रित्य २०१७ तमे ख्रीष्टाब्दे शोधकार्यम् अकरोत्।
5. तुलनात्मकधर्मदर्शनविभागस्य शोधच्छात्रा कविता कुमारी न्यायवैशेषिकविभागस्य डॉ. कुञ्जबिहारीद्विवेदिनो निर्देशने 'सामकालिकभारतीयदर्शने वेदान्तप्रभावपरिशीलनम्' इति विषये २०२३ तमे ख्रीष्टाब्दे स्वीयं शोधकार्यं कृतवती।
6. तुलनात्मकधर्मदर्शनविभागस्य शोधच्छात्र अजयकुमारमौर्यः न्यायवैशेषिकविभागस्य डॉ. कुञ्जबिहारीद्विवेदिनो निर्देशकत्वे 'प्रतीत्यसमुत्पादसिद्धान्तस्य दार्शनिकानुशीलनम्' इति विषयमादाय २०२२ तमे ख्रीष्टाब्दे शोधकार्यमकरोत्।

अनेन विश्वविद्यालयेन तादृशी अपि एका व्यवस्था प्रकल्पिता वर्तते यत्र देशस्य विभिन्नेभ्यः स्थलेभ्यः विशिष्टाः विद्वांसः समागत्य नैकविधान् विषयानाश्रित्य व्याख्यानं ददति येनात्र अधीयानाः छात्राः तेषु विषयेषु निगूढान् विषयान् ज्ञात्वा तद्विषयकशोधनविषये प्रवर्तितुं नवीनां दृष्टिं लभन्ते।

नवीना राष्ट्रीया शिक्षानीतिः अन्तःशास्त्रीयेषु तत्सम्बद्धविषयेषु च अनुसन्धानविषयं प्रोत्साहयति अतः तदनुगुणं विश्वविद्यालयः पाठ्यक्रमस्य संरचनामपि करोति।

गुरूकुलेषु प्राच्यपरम्परया समाश्रियमाणाः विधयोऽत्र विश्वविद्यालयेऽपि अध्ययने अध्यापने च प्रयुज्यन्ते। तत्र अनया पद्धत्या पाठ्यमानो विषयोऽपि अन्तःशास्त्रीयानुसन्धानाय पर्याप्तमवसरं कल्पयति। असौ विधिर्वर्त्तते –

1. **वादविधिः-**वादे वादे जायते तत्त्वबोधः। शास्त्रीयग्रन्थेषु दर्शनग्रन्थेषु च प्रमेयविचारः वादसरण्या प्रतिपादितो वर्तते। अतः वेदान्ते, न्याये, व्याकरणे, मीमांसायां, बौद्धदर्शने, जैनदर्शने, सांख्ययोगे च अध्यापकाः अमुं विधिम् आश्रयन्ते। वाक्यार्थपरिषदि अध्यापकाः विशेषतः अनेन विधिना प्रमेयं प्रतिपादयन्ति।
2. **दृष्टान्तविधिः-**शब्दशास्त्रे नित्यशब्दः, विवर्तवादः, परिणामवादः, वेदान्ते सृष्टिप्रक्रिया, भ्रमः, साहित्ये शब्दशक्तिः, मीमांसायां विभिन्नप्रमेयः एवं नैकेषां विषयाणां पाठने च एषः विधिः प्रयुज्यते। प्रदीयमानेन दृष्टान्तेन दार्ष्टान्तिकस्य सुलभावगतिः सञ्जायते।
3. **अध्यारोप-अपवादविधिः -** सोपानक्रमेण विषयस्य अध्यापनम्। स्थूलात्सूक्ष्मं प्रति, अज्ञाताज्ज्ञातं प्रति, इन्द्रियगम्याद् अतीन्द्रियं प्रति एवं क्रमेण विषयं बोधयितुम् एषः विधिः आश्रीयते। अद्वैतवेदान्ते ब्रह्मणः स्वरूपकथनादौ प्रयुज्यते।
4. **व्याख्यानविधिः-**प्रसिद्धोऽयं विधिः साहित्ये नैषधीयचरितम्, सांख्ये सृष्टिप्रक्रियाम् इतरशास्त्रविषयान् च बोधयितुम् अवलम्बयते।
5. **कथाविधिः-**प्रतिपाद्यस्य विषयस्य सम्बन्धिनः अनेके कथाप्रसङ्गाः उच्यन्ते। काव्यानाम्, पुराणानाम्, उपनिषदां भगवद्गीतायाः च पाठने असौ विधिः आश्रीयते।
6. **समस्यासमाधानविधिः-** शास्त्रीयविषयाणां पाठनसमये आदौ संशयः ततः समाधानं इत्येवं क्रमेण सिद्धान्तस्य स्थापनं क्रियते। विश्वविद्यालयस्य पाठ्यक्रमेषु अत्यन्तोपयोगिनम् एतं विधिम् आश्रयन्ति अध्यापकाः।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/2. |

| | |
|---|---|
| Link for additional Information अतिरिक्तसूचनानां कृते सन्धानम् | View Document (https://ssvv.ac.in/download/c2-new/Nov%208,%20Doc%204_merged_compressed%20-%20Copy%2 |

## 2.4 Teacher Profile and Quality

***2.4.1 Average percentage of full time teachers against sanctioned posts during the last five years***

***अनुमोदितानि पदानि लक्ष्यीकृत्य गतेषु पञ्चसु वर्षेषु नियुक्तानाम् अध्यापकानां मध्यमानस्य प्रतिशतता।***

**Answer:** 78.39

| File Description | Document |
|---|---|
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSF |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSF |

***2.4.2 Average percentage of full time teachers with Ph.D. during the last five years***

***गतेषु पञ्चसु वर्षेषु, विद्यावारिधिः (पीएच.डी) इत्युपाधिमतां पूर्णकालिकाध्यापकानां मध्यमानस्य प्रतिशतता।***

**Answer:** 88.46

2.4.2.1 Number of full time teachers with Ph.D. year-wise during the last five years

विगतपञ्चवर्षेषु, विद्यावारिधिः (पीएच्.डी) इत्युपाधिमतां पूर्णकालिकाध्यापकानां वार्षिकसङ्ख्या।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 88 | 86 | 75 | 69 | 70 |

| File Description | Document |
|---|---|

| | |
|---|---|
| List of number of full time teachers with PhD and number of full time teachers for 5 years (Data Template) गतेषु पञ्चसु वर्षेषु विद्यावारिधिमतां पूर्णकालिकाध्यापकानां तथा पूर्णकालिकाध्यापकानाञ्च सूची | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103( |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103( |

***2.4.3 Average teaching experience of full time teachers in number of years***

***पूर्णकालिकाध्यापकानाम् अध्यापनानुभवस्य वर्षप्रमाणेन मध्यमानम्***

**Answer:** 0.1

2.4.3.1 Total experience of full-time teachers

पूर्णकालिकाध्यापकानां सम्पूर्णः अध्यापनानुभवः

Answer: 10

| File Description | Document |
|---|---|
| List of Teachers including their PAN, designation, dept and experience details (Data Template) आयकरसङ्ख्या-पदवी-विभाग-अनुभवानां विवरणसहिता अध्यापकसूची | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/2.4 |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/2.4 |

***2.4.4 Average percentage of full time teachers who received awards, recognition, fellowships at State, National, International level from Government recognised bodies during the last five years***

***विगतपञ्चवर्षेषु राज्य-राष्ट्र-अन्ताराष्ट्रस्तरेषु, सर्वकार-सर्वकाराभिज्ञातनिकायैः पुरस्कारं प्राप्तवतां पूर्णकालिकाध्यापकानां मध्यमानस्य प्रतिशतता।***

**Answer:** 7.63

2.4.4.1 Number of full time teachers receiving awards from state/ national/ international level from Government recognised bodies year-wise during the last five years

विगतपञ्चवर्षेषु राज्य-राष्ट्र-अन्ताराष्ट्रस्तरेषु, सर्वकार-सर्वकाराभिज्ञातनिकायैः पुरस्कारं प्राप्तवतां पूर्णकालिकाध्यापकानां वार्षिकसङ्ख्या।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 8 | 10 | 6 | 4 | 6 |

| File Description | Document |
|---|---|
| Institutional data: as per Data Template सांस्थानिकदत्तांशः देयः (दत्तांशप्रारूपम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/2. |
| e-copies of award letters (scanned or soft copy) पुरस्कारसम्बद्धानां पत्राणां वैद्युतप्रतिलिपयः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/2. |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/2. |

***2.4.5 Average percentage of full time teachers from other States against sanctioned posts during the last five years***

***विगतपञ्चवर्षेषु अनुमोदितेषु पदेषु अन्यराज्येभ्यः नियुक्तानां पूर्णकालिकाध्यापकानां मध्यमानस्य प्रतिशतता।***

**Answer:** 9.82

2.4.5.1 Number of full time teachers from other states year-wise during the last five years -

विगतपञ्चवर्षेषु अन्यराज्येभ्यः नियुक्तानां पूर्णकालिकाध्यापकानां वार्षिकसङ्ख्या -

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 11 | 11 | 11 | 11 | 11 |

| File Description | Document |
|---|---|
| List of full time teachers from other state and state from which qualifying degree was obtained (Data Template) अन्यराज्येभ्यः नियुक्तानां पूर्णकालिकाध्यापकानां सूची। राज्यस्य नामसहिता यतः तैः प्रमाणपत्रं प्राप्तम्। (दत्तांशप्रारूपम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/10300 |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/10300 |

***2.4.6 University has devised a mechanism to enable the young faculty to learn shastras under learned Gurus. Specify the names of Gurus from whom the teachers/ faculty members have studied Shastras/ Veda Shakhas.***

***विश्वविद्यालयः युवाध्यापकान् वरिष्ठविदुषां सन्निधौ शास्त्राध्ययनाय प्रोत्साहयति। गुरूणां नामानि सूचयन्तु येभ्यः अध्यापकाः शास्त्राणां वेदशाखानां वा पारम्परिकम् अध्ययनमकुर्वन्।***

**Answer:**

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन तादृशी व्यवस्था प्रकल्पिता वर्त्तते यत्र अस्य विश्वविद्यालयस्य युवानोऽध्यापकाः वरिष्ठानाम् आचार्याणां सन्निधौ यथेप्सितंशास्त्रं पठितुं शक्नुवन्ति। अत्र युवानोऽध्यापकाः लब्धावसराः गुरुगेहं गत्वा अपि प्रौढान् परम्परागतग्रन्थान् गुरुसविधेऽधीयते। एवं हि परस्परं प्रेम्णा व्यवहरन्तः तौ उभावपि गुरुशिष्यौ स्वजीवनम् उन्नतिपथं नयतः।

अस्मिन् विश्वविद्यालये प्रत्येकं विभागः काले काले 'शास्त्रीयव्याख्यानमाला' इति प्रकल्पं सञ्चाल्य आविश्वं प्रसिद्धानां तत्तद्विषयेषु विचक्षणानां विदुषां व्याख्यानानि आयोजयति। तेषां विदुषां व्याख्यानस्य कार्यक्रमस्य रूपरेखां सङ्कायाध्यक्षः विभागाध्यक्षेण विभागस्थैः आचार्यैश्च सार्धं सम्मिल्य सज्जीकरोति। तेषां विदुषां व्याख्यानस्य अयं लाभो भवति यत् विभागेषु ये युवानोऽध्यापकाः शोधच्छात्राश्च भवन्ति तेभ्यः बहु किमपि शिक्षणाय लभ्यते। तेषां समागतानां विदुषां पुरस्तात् ते स्वकीयान् प्रश्नान् अपि निश्चिते प्रश्नोत्तरकाले प्रष्टुम् अर्हन्ति तान् च समाधातुं शक्नुवन्ति ।

विश्वविद्यालयः यथानिर्धारितं शास्त्रार्थसभायाः आयोजनम् अपि करोति। तत्र शास्त्रार्थसभायां वरिष्ठानां गुरूणां सान्निध्ये युवभ्योऽध्यापकेभ्योऽपि बहूनि दायित्वानि दीयन्ते येन ते बहुविधमनुभवज्ञानं प्राप्नुवन्ति। अस्यां शास्त्रार्थसभायां युवानोऽध्यापकाः संयोजकरूपेणापि स्वीयं दायित्वं निर्वहन्ति। अनया परम्परयाशिक्षकाः शनैः शनैः तस्मिन् क्षेत्रे निपुणाः भवन्ति।

इत्थमेव यून: शिक्षकान् प्रशिक्षितुम् यथावसरं विश्वविद्यालयोऽयं कार्यशालानाम् अपि आयोजनं करोति। तत्रापि कार्यशालायां प्रथितयशसां विदुषां विशिष्टानि व्याख्यानानि आयोज्यन्ते। अत्रापि शास्त्रार्थसभामिव वरिष्ठानाम् आचार्याणां सन्निधौ कनिष्ठेभ्य आचार्येभ्य: संयोजकादीनां दायित्वं प्रदाय तेषां प्रशिक्षणं क्रियते।

अस्मिन् विश्वविद्यालये सद्यस्क (ऑनलाइन) माध्यमेनापि माननीयानां विदुषां विशिष्टानि व्याख्यानानि आयोज्यन्ते। एतस्य विशिष्टस्य व्याख्यानस्य कार्यक्रम: साप्ताहिको भवति। एतस्य कार्यक्रमस्य अध्यक्षा: विश्वविद्यालयस्यैव कुलपतयो भवन्ति। अयं कार्यक्रम: Google meet, Zoom इत्यादिभि: सद्यस्कउपकरणमाध्यमै: प्रतिसप्ताहम् आयोज्यते।

अस्मिन् विश्वविद्यालये न केवलम् इयमेव परिपाटी वर्त्तते यत् वरिष्ठेभ्य आचार्येभ्यो युवानोऽध्यापका: अधीयते किन्तु युवभ्योऽध्यापकेभ्य: शोधच्छात्रा: अपि समागत्य तं तं विषयं विषयातिरिक्तान् अपि च ग्रन्थान् पठन्ति। युवभ्योऽध्यापकेभ्य: पठिता: सामग्री: शोधच्छात्रा: स्वीये शोधप्रबन्धेऽपि समाकलयन्ति येन तत्रापि गुणाधानं भवति। विश्वविद्यालये इयं प्रक्रिया न केवलं कस्मिंश्चिद् विभागविशेषे भवति अपि तु अस्य विश्वविद्यालयस्य येऽपि सङ्काया: वर्त्तन्ते पुनस्तेषु सङ्कायेषु येऽपि विभिन्ना: व्याकरणादयो विभागा: सन्ति तत्र सर्वत्र विधीयते।

अस्मिन् विश्वविद्यालये यथा वरिष्ठा आचार्या: यूनोऽध्यापकान् अध्यापयन्ति, युवानोऽध्यापका: शोधच्छात्रान् पाठयन्ति तथैव शोधच्छात्रा अपि अस्य विश्वविद्यालयस्य कनिष्ठान् छात्रान् अध्यापयन्ति। तेन शोधच्छात्राणापि लाभो भवतीति। एवं प्रवर्तितं चक्रमिदं परस्परं सर्वेषां लाभप्रदं भवति। साम्प्रतं वरिष्ठेभ्य आचार्येभ्य ये युवान आचार्या अधीयते अधीतवन्तो वा तेषां केषाञ्चित् नामधेयं प्रस्तूयते –

| क्रमसंख्या | अध्यापक: | गुरोर्नाम | शास्त्रम् |
|---|---|---|---|
| 1. | डॉ. दुर्गेश पाठक: | प्रो. राजा राम शुक्ल:, काशी हिन्दू विश्वविद्यालय:, वाराणसी, कुलपतिचर: - सं.सं.वि.वि., वाराणसी | न्याय: |
| 2. | डॉ. कुप्पा बिल्वेश: | डॉ. आर. मणिद्राविड:, मद्रास् संस्कृत कालेज, मैलापूर, चेन्नै | अद्वैतवेदान्त: |
| 3. | डॉ. सत्येन्द्र कुमार: | प्रो. महेन्द्र पाण्डेय:, सं.सं.वि.वि., वाराणसी | वेद: |
| 4. | डॉ. राजा पाठक: | प्रो. नागेन्द्र पाण्डेय: सेवानिवृत्त:, सं.सं.वि.वि., वाराणसी | ज्योतिषम् |
| 5. | डॉ. राजेश कुमार श्रीवास्तव: | प्रो. रमेश प्रसाद:, सं.सं.वि.वि., वाराणसी | पालि |
| 6. | डॉ. दिव्य चेतन ब्रह्मचारी | आचार्य पुरुषोत्तम त्रिपाठी उदासीन सं. महाविद्यालय, मीरघाट | व्याकरणम् |
| 7. | श्री नितिन आर्य: | डॉ. रविशङ्कर पाण्डेय:, सं.सं.वि.वि., वाराणसी | व्याकरणम् |

8. डॉ. मधुसूदन मिश्र प्रो. रामजीवन मिश्रः
ज्योतिषम्

ज्योतिष विभाग, का.हि.वि.वि., वाराणसी

9. डॉ. कुञ्ज बिहारी द्विवेदी 1. प्रो. वशिष्ठ त्रिपाठी
न्याय

सं.सं.वि.वि., वाराणसी

2. प्रो. राजा राम शुक्लः

का.हि.वि.वि., वाराणसी

10. डॉ. ज्ञानेन्द्र सापकोटा आचार्य पुरुषोत्तम त्रिपाठी
व्याकरण

उदासीन संस्कृत महाविद्यालय

मीरघाट

11. डॉ. बिजेन्द्र कुमार आर्य आचार्य रामदेव शास्त्री जी
व्याकरण

महर्षि दयानन्द उपदेशक महाविद्यालय

टंकारा, गुजरात

12. डॉ. विजय कुमार शर्मा प्रो. युगल किशोर मिश्रः
वेद

सं.सं.वि.वि., वाराणसी

13. डॉ. मधुसूदन तिवारी प्रो. अमित कुमार शुक्लः
ज्योतिषम्

सं.सं.वि.वि., वाराणसी

एवं संस्कृतविश्वविद्यालये एषा समीचीना ज्ञानविवर्धिनी परम्परावर्त्तते यत्रयुवानोऽध्यापकाः वरिष्ठेभ्य आचार्येभ्यः अधीयते।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्तसूचनानां कृते सन्धानम् | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/2. |
| Link for additional Information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document (https://ssvv.ac.in/download/C2-L/2.3.6%20Video.pdf) |

***2.4.7 Qualified faculty are available for new programmes/ emerging areas of study (computational linguistics, Computational Sanskrit, Translation Studies,***

***Comparative Philosophy, Comparative Aesthetics, Yogic Science, Yoga Darshan, Samskrit Journalism, Sanskrit manuscriptology, Management, Jurisprudence, Cultural tourism, Temple Culture and Administration, Vastushastra, Medicinal Astrology etc.)***

***नूतनपाठ्यक्रमाणाम् उदयमान-क्षेत्राणां (सङ्गणकीय-भाषाशास्त्रं, सङ्गणकीय-संस्कृतम्, अनुवादाध्ययनं, तुलनात्मकदर्शनं, तुलनात्मकं सौन्दर्यशास्त्रं, योगविज्ञानम्, योगदर्शनं, संस्कृतपत्रकारिता, संस्कृतमातृकाशास्त्रम्, प्रबन्धनशास्त्रं, विधिशास्त्रं, सांस्कृतिकयात्रिकं, देवालयसंस्कृतिः प्रशासनं च, भैषज्यज्योतिषं, वास्तुशास्त्रम् इत्यादीनाम्) अध्यापनाय योग्यतावन्तः अध्यापकाः उपलभ्यन्ते।***

**Answer:**

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये नूतनकारकाणाम् उदयमान-क्षेत्राणानां तद्यथा (शोधपत्राणि, परियोजनाः, परामर्शः, प्रशिक्षाणानुभवः, धर्मशास्त्रं, सांस्कृतिकपर्यटनं, संगणकीयभाषाशास्त्रं, संगणकीय-संस्कृतं, अनुवादाध्ययनं, तोलनिकं दर्शनं, तोलनिकं सौन्दर्यशास्त्रं, योगविज्ञानं, योगदर्शनं, संस्कृतपत्रकारिता, संस्कृतपाण्डुलिपिविज्ञानं, प्रबन्धनं, न्यायशास्त्रं देवालयसंस्कृतिः प्रशासनं च, भैषज्यज्योतिषं, वास्तुशास्त्रम् इत्यादीनाम्) सर्वेषां विषयाणाम् अध्यापनाय अध्यापकाः समुपलब्धाः सन्ति।

**शोधपत्राणि –** 'सारस्वती सुषमा' इति पत्रिका अस्मिन् एव विश्वविद्यालये प्रकाशिता भवति। अस्यां पत्रिकायां विश्वविद्यालयस्य बहिस्थानामपि च विदुषां शोधपत्राणि प्रकाशी भवन्ति। एतेषां शिक्षकाणां लेखाः उत्कृष्टाः भवन्ति। अत्रत्यानां शोधच्छात्राणामपि शोधलेखा पत्रिकासु प्रकाश्यन्ते। श्रमणविद्यासङ्कााये सङ्कायस्तरीया शोधपत्रिका प्रकाश्यते। तस्यां सङ्कायशोधपत्रिकायां विश्वविद्यालयस्य सर्वविभागस्य छात्राः अध्यापकाः स्वस्वशोधपत्राणि विलिख्य प्रकाशयन्ति।

**परियोजना –** उत्तरप्रदेशसर्वकारस्य उच्चशिक्षाविभागेन 'रिसर्चएण्ड डेवलपमेण्ट' योजनान्तर्गतम् अस्य विश्वविद्यालयस्य डॉ. विजयकुमारशर्मणे, सहायकाचार्याय वेदविभागस्य 'पंचविध सूत्र एवं मात्रालक्षण का सानुवाद समीक्षण' विषये लघुशोधपरियोजना स्वीकृता। केन्द्रीयसंस्कृतविश्वविद्यालयस्य अनुदानप्रदानयोजनान्तर्गतं डॉ. मधुसूदनमिश्राय, सहायकाचार्याय, ज्योतिषविभागस्य, 'अष्टादशी' प्रोजेक्ट २०२१-२२ स्वीकृतम्। अखिल-भारतीय-तकनीकी-शिक्षापरिषद: अन्तर्गते भारतीयज्ञानपरम्पराक्रमे चतुष्षष्टिकलानां विषये विशेषाध्ययनार्थम् एका परियोजना स्वीकृता विद्यते। अस्यां परियोजनायां विंशत्यधिका: अध्यापका: छात्राश्च प्राच्यग्रन्थेषु प्रस्तुतपरियोजनामाध्यमेन चतुष्षष्टिकलाविषयकतत्त्वानां समाजहिताय सङ्कलीकरणं कुर्वन्त: सक्रिया: सन्ति।

**परामर्श:** - अस्य विश्वविद्यालयस्य ज्योतिषविभागे एकः **'ज्योतिष एवं वास्तु परामर्श केन्द्रम्'** उद्घटितं वर्तते यस्मिन् ज्योतिषशास्त्रस्य दृष्ट्या जनेभ्य: परामर्श: दीयते। अयं प्रकल्पः ज्योतिषविभागीयानाम् आचार्याणां निर्देशने एव प्रचलति।

**प्रशिक्षणानुभव:** - विश्वविद्यालये अध्ययनाध्यापनेन सह प्रशिक्षणकार्यक्रमा: विशेषरूपेण सञ्चालिता: भवन्ति। छात्रेभ्य: संस्कृतसंभाषणप्रशिक्षणं शिविरमाध्यमेन प्रदीयते। शोधे पञ्जीकृतानां छात्राणाङ्कृते षण्मासात्मकपाठ्यक्रमाय विशेषप्रशिक्षणकार्यक्रम: समायोज्यते। तत्र अत्रत्यै: अध्यापकैः अन्यविश्वविद्यालयस्य अध्यापकैश्च शोधकार्यकरणाय प्रशिक्षणं प्रदीयते।

**धर्मशास्त्रम्** – विश्वविद्यालयेऽस्मिन् धर्मशास्त्राध्ययनाध्यापनाय स्वतन्त्र: एकोविभागोऽस्ति। अस्मिन् विभागे भारतीयज्ञानपरम्परायां तत्त्वभूतानां स्मृतिग्रन्थानां दृष्ट्या सर्वे भारतीयसंस्कारा: हिन्दूसंस्कृतिश्च सूक्ष्मदृष्ट्या पाठ्यन्ते।

**सांस्कृतिकपर्यटनम्** – छात्राणाम् अध्यापकानां च नूतनानुभवो ज्ञानञ्च भवेदिति हेतुना छात्रै: सह अध्यापका: अपि सांस्कृतिकपर्यटनस्थलेषु गत्वा स्वानुभवे ज्ञानवृद्धिं कुर्वन्ति।

**सङ्गणकीयं भाषाशास्त्रम्** – सङ्गणकीयभाषाशास्त्रानुगुणं संगणकस्य अध्ययनाध्यापनमपि विश्वविद्यालये भवति। शोधछात्राणां कृते विशेषतया सङ्गणकप्रशिक्षणं प्रदीयते।

**सङ्गणकीयंसंस्कृतम् –** अयं विश्वविद्यालय: संस्कृताध्ययनेन सहैव संरक्षणकाध्ययनं प्रति अपि ध्यानं केन्द्रीकरोति। शास्त्रिकक्षायां तु संस्कृताध्ययनेन सह सङ्गणकमनिवार्यं कृतं वर्त्तते। विश्वविद्यालये संस्कृतेन सह सङ्गणकस्य प्रशिक्षणार्थं एका सङ्गणकशाला अपि निर्मिता वर्त्तते यत्र गत्वा छात्रा: सङ्गणकस्य प्रशिक्षणं प्राप्नुवन्ति।

**अनुवादाध्ययनम् -** अस्य विश्वविद्यालयस्य अध्यापकाः अनुवादस्य अध्ययने दत्तचित्ता: सन्ति। अनुवादाध्ययनस्य कृते यथावसरं विश्वविद्यालय: संस्कृतकार्यशालाः, संस्कृतसम्भाषणशिविराणि च आयोजयति।

**तोलनिकं दर्शनम् –** अस्मिन् विश्वविद्यालये एकः तुलनात्मकदर्शनविभागो वर्त्तते। अत्र विभागे सर्वेषां दर्शनानां तुलनात्मकम् अध्ययनम् अध्यापनं क्रियते। बहवः शोधच्छात्रा दर्शनानां तुलनात्मकदृशा शोधकार्यमत्र विभागेऽकुर्वन्।

**तोलनिकं सौन्दर्यशास्त्रम् –** दीनदयालउपाध्यायकौशलकेन्द्र केन्द्रीय छात्रा: गृहसज्जाविषयकं सौन्दर्यशास्त्रं पठन्ति। एवञ्च साहित्यविभागे साहित्यग्रन्थेषु प्राकृतिकं सौन्दर्यं, पात्राणां पारस्परिकं सौन्दर्यम्, परिधानानां सौन्दर्यम् इत्यादिविषयान् आश्रित्य सौन्दर्यतुलनात्मकम् अध्ययनं कार्यते।

**योगविज्ञानं, योगदर्शनम् -** दर्शनविभागे एव योगदर्शनस्यापि विधिवदध्ययनम् अध्यापनञ्च भवति। योगस्य लक्षणम्, स्वरूपम्, फलम्, लाभालाभौ इति योगदर्शने दर्शित: सर्वोऽपि विषयोऽस्मिन् विभागे निष्णातै: आचार्यै: अध्याप्यते।

**संस्कृतपत्रकारिता –** अस्मात् विश्वविद्यालयत: 'गाण्डीवम्' इति एका संस्कृतपत्रिका प्रकाश्यते। तत्र विशिष्टानां विदुषां लेखा: प्रकाश्यन्ते।

**संस्कृतपाण्डुलिपिविज्ञानम् -** संस्कृतस्य प्रचुरपाण्डुलिपय: अस्य विश्वविद्यालयस्य 'पाण्डुलिपिभवने' समुपलब्धा: वर्त्तन्ते। छात्रा: अध्यापकाश्च स्वविद्यावैभववर्धनाय हस्तलेखागारं गत्वा पाण्डुलिपिं यथासमयं पश्यन्ति पठन्ति च।

**प्रबन्धनम् –** अस्य विश्वविद्यालयस्य पाठ्यक्रमेषु प्रबन्धस्य विषय: अपि पाठ्यते। कौटिल्यस्य अर्थशास्त्रे अर्थविषयक प्रबन्धस्य विषय: समुपलभ्यते। यस्य पठनं पाठनं राजनीति एवं अर्थशास्त्रविभागे भवति। वेदविभागीय पाठ्यक्रमेषु न केवलं जलप्रबन्धनम् अपितु वनप्रबन्धनस्यापि विशेषचर्चा समुपलभ्यते। साहित्यविषये करप्रबन्धनमपि पाठ्यक्रमस्य भाग: अस्ति।

**विधिशास्त्रम् –** विश्वविद्यालयेऽस्मिन् प्राच्यविधिशास्त्रस्य अध्ययनाध्यापनं क्रियते। विशेषत: विधिशास्त्रविषये मनुस्मृतौ, याज्ञवल्क्यस्मृतौ चेत्यादिषु शास्त्रेषु विधिविषयस्य व्यापिकाचर्चाविद्यते।

**देवालयसंस्कृति: प्रशासनं च –** विश्वविद्यालयस्य परिसरे पञ्चदेवमन्दिरम्, वाग्देवीमन्दिरम्, इत्यादि दशाधिकानि मन्दिराणि वर्त्तन्ते येषां प्रबन्धनं छात्रै: अध्यापकैश्च क्रियते। देवालये प्राणप्रतिष्ठितानां देवानां शास्त्रवर्णितदेवगुणानुकूलेन पूजासंस्कृति: सञ्चाल्यते एवं तत्तद्देवस्वरूपोचितपूजाव्यवस्थाया: प्रशासनिककार्यमपि अत्रत्यै: छात्रै: अध्यापकैश्च क्रियते। मन्दिरस्य शासनव्यवस्थासुदृढीकरणार्थं मन्दिरव्यस्थापकपदे अध्यापका: नियोजिता: सन्ति।

**भैषज्यज्योतिषम् –** भैषज्यज्योतिषसिद्धान्तमनुसृत्य पाणिनिभवनस्य पार्श्वभागे 'नवग्रहवाटिकाया:' स्थापना जाता विद्यते। तत्र ज्योतिषशास्त्रस्य कालगणनादिशा वनस्पतीनां रोपणं जातमस्ति।

**वास्तुशास्त्रम् –** विश्वविद्यालयस्य ज्योतिषविभागे, दीनदयालउपाध्याय-कौशल-केन्द्रे, ऑनलाइनसंस्कृतप्रशिक्षणकेन्द्रे च वास्तुशास्त्रविषयकम् अध्ययनाध्यापनं भवति।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/2. |
| Link for additional Information अतिरिक्तसूचनानां कृते सन्धानम् | View Document (https://ssvv.ac.in/download/c2-new/Project%20Swikr |

***2.4.8 Specify the names of Shastra-Chudamani/ Emeritus/ Adjunct Faculty/ Fellows/ Visiting Professors/ Post Doctoral Fellows on the rolls of the University.***

*विश्वविद्यालयेन सह सम्बद्धानां शास्त्रचूडामणिविदुषां, राष्ट्रस्तरीयाचार्याणाम्, अतिथ्याचार्याणां, संयोजिताचार्याणां, प्रतिष्ठिताचार्याणां, विद्यावारिध्युत्तरशोधरतानां विदुषां च नामानि सूचयन्तु।*

**Answer:**

सम्पूर्णानन्दसंस्कृतविश्वविद्यालय: विश्वविख्यातानां विविधशास्त्रविचक्षणानां शास्त्रचूड़ामणिविदुषां, राष्ट्रस्तरीयाचार्याणाम्, अतिथ्याचार्याणाम्, संयोजिताचार्याणाम्, प्रतिष्ठिताचार्याणाम्, विद्यावारिध्युत्तरशोधरतानां विदुषां च सम्बन्धं स्थापयति। अस्मिन् विश्वविद्यालये प्रत्यक्षसमागतानाम् अन्तर्जालमाध्यमेन सम्बद्धानां महनीय विदुषाम् अभिधानानि क्रमेण प्रदर्श्यन्ते।

स्वामी राघवाचार्य जी महाराज, अयोध्या।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयद्वारा २००० तमे आयोजितायां वेदान्तपरीक्षायां सर्वप्रथम स्थानं प्राप्य स्वर्णपदकमधिकृतम्। सम्प्राप्तं स्वकीयोपदेशमाध्यमेन मानवमात्रस्य कल्याणे सततं संलग्ना: सन्ति।

जगद्गुरु स्वामी वासुदेवाचार्य विद्याभास्कर जी महाराज, अयोध्या।

विद्याभास्कर विद्याभास्करस्य उपाधिना विभूषिता: जगद्गुरव: रामानुजाचार्या: स्वामिन: श्रीवासुदेवाचार्या: अपि समाजे निरन्तमेव निजसंस्कृतिं संस्कारान् च प्रसारयन्ति। इमे श्रीरामजन्मभूमे: उच्चमार्गदर्शकमण्डलस्य वरिष्ठा: पदाधिकारिणोऽपि सन्ति।

स्वामी अविमुक्तेश्वरानन्द सरस्वती, जगद्गुरु शंकराचार्य, ज्योतिर्मठ, उत्तराखण्ड।

स्वामी स्वरूपानन्द सरस्वतीनां शिष्या: स्वामी अविमुक्तेश्वरानन्द सरस्वती महाभागा: सम्प्रति उत्तराखण्डे विद्यमानस्य ज्योतिर्मठस्य षट्चत्वारिंशत्तमा: वर्तमानकालिका: जगद्गुरव: शंकराचार्या: वर्त्तन्ते।

पद्मश्री, पद्मभूषण प्रो. देवीप्रसाद द्विवेदी, सं.सं.वि.वि., वाराणसी।

प्रो. राजाराम शुक्ल:, कुलपतिचर:, सं.सं.वि.वि., वाराणसी। निदेशक, मालवीय भवन, का.हि.वि.वि., वाराणसी।

प्रो. हरेराम त्रिपाठी, कुलपतिचर:, सं.सं.वि.वि., वाराणसी। वर्तमाने कुलपतय: कविगुलगुरु कालिदास संस्कृत विश्वविद्यालय:, रामटेक, नागपुर, महाराष्ट्र।

प्रो. नागेन्द्र पाण्डेय:, अध्यक्षचर:, उ.प्र.सं.सं., लखनऊ। आचार्यचर:, सं.वि.वि.वि., वाराणसी। अध्यक्ष:-श्रीकाशी-विश्वनाथमन्दिरन्यास, वाराणसी।

राष्ट्रपति पुरस्कृत प्रो. रमेशप्रसाद, आचार्य:, पालि एवं बौद्ध विभाग, सं.सं.वि.वि., वाराणसी।

प्रो. रजनीश कुमार शुक्ल:, कुलपतिचर:, महात्मा गांधी अन्तर्राष्ट्रीय हिन्दी विश्वविद्यालय:, वर्धा, महाराष्ट्र।

प्रो. प्रेमनारायण सिंह, निदेशक, आई.यू.सी.टी.ई. का.हि.वि.वि., वाराणसी।

पद्मभूषण प्रो. वशिष्ठ त्रिपाठी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय:, वाराणसी।

पद्मश्री पं. शिवनाथ मिश्र, प्रसिद्ध सितारवादक:, वाराणसी।

पद्मश्री अभिराज राजेन्द्रमिश्र:, भूतपूर्व कुलपति, सं.सं.वि.वि., वाराणसी।

राष्ट्रपति सम्मानित प्रो. ब्रजभूषण ओझा, काशी हिन्दू विश्वविद्यालय, वाराणसी।

प्रो. गंगाधर पण्डा, शिक्षाशास्त्रज्ञ, (कोल्हणविश्वविद्यालय, चाईवासा, झारखण्ड)।

प्रो. ललित कुमार त्रिपाठी, गङ्गानाथ झा परिसर, प्रयागराज।

प्रो. पुरुषोत्तम पाठक:, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय:, वाराणसी।

प्रो. प्रमोद कुमार शर्मा, आचार्य:, ज.ने.वि., नवदेहली।

एते आचार्या: महान्त: कवय: सन्ति। एतै: विरचिताया: कृते: 'गोपाङ्गनावैभवम्' इत्यस्य कृते राजस्थान संस्कृत अकादम्या विशेषेण एते सभाजिता:।

डॉ. राजा पाठक:, सहायकाचार्य:, आई.यू.सी.टी.ई.का.हि.वि.वि., वाराणसी।

एतान् विश्वविद्यालयस्य संकायस्य सम्माननीयान् आचार्यान् अतिरिच्य ये अन्ये प्रसिद्धा: देशस्य विद्वांस: सन्ति, येषां सान्निध्यं यथावसरं विश्वविद्यालयाय लभ्यते, तेषां अभिधानानि अपि अत्र लिख्यन्ते।

प्रो. श्रीनिवासवरखेड़ी, कुलपति, के.स.वि., नवदेहली।

श्री चमूकृष्ण शास्त्री, संस्कृत भारती, नवदेहली।

स्वामी जीतेन्द्रानन्द सरस्वती, राष्ट्रीयमहामंत्री, अखिलभारतीय सन्तसमितिः।

पूज्य भाई श्री रमेशभाई ओझा, गुजरात।

योगगुरु स्वामी रामदेव जी महराज, महर्षि पतञ्जलि योगपीठ, हरिद्वार।

प्रो. वाचस्पतिमिश्रः, अध्यक्षः, उत्तरप्रदेशसंस्कृतसंस्थानम्, लखनऊ।

प्रो. सी.जी. मेनन, कुलपति, महर्षिपाणिनिसंस्कृत एवं वैदिकविश्वविद्यालयः, उज्जैन।

प्रो. सन्तोष कुमार शुक्ल, संकायाध्यक्षः, संस्कृत संकाय, जे.एन.यू., नवदेहली।

प्रो. ओमनाथ बिमली, संकायाध्यक्षः, संस्कृत संकाय, दिल्ली विश्वविद्यालयः, देहली।

प्रो. बृहस्पतिमिश्रः, संकायाध्यक्षः, संस्कृत संकाय, हि.के.वि.वि., धर्मशाला।

प्रो. चान्दकिरणसलूजा, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली।

प्रो. रमेश कुमार पाठकः, साहित्यवित्, सत्रयाध्यक्षः, एल.बी.एस., राष्ट्रिसंस्कृतविश्वविद्यालयः, देहली।

डॉ. ऋषभ चन्द्र जैन, अहिंसा अनुसंधान केन्द्रम्, वैशाली।

प्रो. ललित पटेल, कुलपति, सोमनाथ संस्कृत विश्वविद्यालयः, गुजरात।

प्रो. गिरीश चन्द्र दूबे, राम भद्राचार्य विश्वविद्यालय।

डॉ. नीलेश पाण्डेय, सहायक निदेशकः , नैक।

प्रो. एस.सी. शर्मा, निदेशकः, नैक।

प्रो. गोपबन्धु मिश्रः, काशीहिन्दूविश्वविद्यालयः, वाराणसी।

प्रो. मुरलीमनोहर पाठक, कुलपति, ला०ब०शा०, के०सं०वि०, नवदेहली।

प्रो. चैदूडी उपेन्द्र राव, आचार्य, ज०ने०वि०, नवदेहली।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्तसूचनानां कृते सन्धानम् | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/2. |
| Link for additional Information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document (https://ssvv.ac.in/download/C2-L/2.4.7.pdf) |

***2.4.9 Specify the systems adopted to recharge academically and rejuvenate teachers (e.g. learning with traditional Gurus, providing research grants, study leave, nomination to national/ international conferences/ seminars, in-service training, organizing national/ international conferences, vakyartha-Sadhas, Shastrtha-Sabha, Shastra-Pareeksha, Shastra-spardha/ Samskrita-Kavi-Samavaya (Sanskrit Poets' Meet) etc.)***

*अध्यापकान् शैक्षिकरूपेण पुनर्नवीकर्तुम् अभिगृहीताः व्यवस्थाः सूचयतु- यथा- पारम्परिकगुरूणां*

***सविधे अध्ययनम्, अनुसन्धानानुदानप्रदानम्, अध्ययनावकाशप्रदानम्, राष्ट्रिय/ अन्ताराष्ट्रियसम्मेलने नामनिर्देशनम्/ सेवारतप्रशिक्षणं, राष्ट्रिय/ अन्ताराष्ट्रियसम्मेलनस्य आयोजनं, वाक्यार्थसभाः, शास्त्रार्थसभाः, शास्त्रपरीक्षाः, शास्त्रस्पर्धाः, संस्कृतकवि-समवायः इत्यादयः।***

**Answer:**

अत्रत्यानाम् आचार्याणां शैक्षिकरूपेण पुनर्नवीकरणाय विश्वविद्यालयेन अनेके कार्यक्रमाः समायोज्यन्ते । विश्वविद्यालयानुदान आयोगेन तथा भारतसर्वकारेण निर्धारिताः अनेके कार्यक्रमाः अध्ययनावकाशप्रदानम्, राष्ट्रियअन्ताराष्ट्रियसम्मेलने नामनिर्देशनम् सेवारतप्रशिक्षणम्, राष्ट्रिय,अन्ताराष्ट्रियसम्मेलनस्य आयोजनम् इति नैकाः व्यवस्थाः कल्पयति विश्वविद्यालयः । विश्वविद्यालये अध्यापनरतानाम् अध्यापकानां वाक्यार्थसभाः, शास्त्रार्थसभाः, शास्त्रपरीक्षाः, शास्त्रस्पर्धाः, संस्कृतकविसमवायः इत्यादयः कार्यक्रमाश्च यथावसरमवाप्य समायोजिताः भवन्ति । पारम्परिकगुरुणां सविधे अध्ययनम् - काश्यां प्राचीनेयं परम्परा यत् शिष्याः विश्वविद्यालये गुरोः गृहे च गत्वा पारम्परिकरूपेण शास्त्राध्ययनं कुर्वन्ति । गुरवः स्वजीवने प्राप्तपरम्परानुगुणं स्वशिष्येभ्यः शास्त्रीयविषयान् उपदिशन्ति।

**अध्ययनावकाशप्रदानं सेवारतप्रशिक्षणञ्च -** विश्वविद्यालये अध्यापकानाम् अध्ययनार्थं प्रशिक्षणार्थञ्च अवकाशः स्वीक्रियते। अभिविन्यासपुनश्चर्यापाठ्यक्रमः विद्यावारिध्युपाधिप्राप्त्यर्थञ्च विश्वविद्यालये अध्यापकानां कृते अवकाशः स्वीकृतोऽस्ति । विश्वविद्यालये अध्यापननिरतानाम् अध्यापकानां कृते विश्वविद्यालयानुदान आयोगस्य नियमानुसारम् अपेक्षितेषु सेवानिरतप्रशिक्षणेषु भागं ग्रहीतुं अवसरः कल्प्यते। ते अध्यापकाः यूजीसी.मानवसंसाधनविकासकेन्द्रद्वारा आयोज्यमाने पुनश्चर्यापाठ्यक्रमे अभिविन्यासपाठ्यक्रमे च भागग्रहणाय प्रेष्यन्ते। अध्यापकाः एतत्पाठ्यक्रमे भागं गृहीत्वा नैकानि अध्यापनकौशलानि प्राप्नुवन्ति । विश्वविद्यालये कार्यरताः अध्यापकाः पुनश्चर्यापाठ्यक्रमे, अभिविन्यासपाठ्यक्रमे अन्येषु च विभिन्नपाठ्यक्रमेषु भागम् अगृह्णन् । अध्ययनाय प्राप्तावकाशानाम् अध्यापकानां सूची-

**अभिविन्यासपाठ्यक्रमे** (Orientation Programme)

| क्रम संख्या | नाम | संस्था | सन् |
|---|---|---|---|
| 1. | डॉ. विजेन्द्रआर्य | रामानुजमकालेज, दिल्लीविश्वविद्यालयः | 19 जून से 18 जुलाई 2021 |
| 2. | डॉ. कुंजबिहारी | रामानुजमकालेज, दिल्लीविश्वविद्यालयः | 20 अक्टूबर से 18 नवम्बर 2022 |
| 3. | डॉ. मधुसूदनमिश्रः | ” | 20 अक्टूबर से 18 नवम्बर 2022 |
| 4. | श्रीनितिनआर्यः | ” | 20 अक्टूबर से 18 नवम्बर 2022 |

**पुनष्चर्यापाठ्यक्रमे (RC)**

| क्रम संख्या | नाम | संस्था | सन् |
|---|---|---|---|
| 1. | डॉ. मधुसूदनमिश्रः | एच.आर.डी.सी., काशीहिन्दूविश्वविद्यालयः, वाराणसी | 27 अगस्त- 09 सितम्बर 2021 |
| 2. | डॉ. विजेन्द्रआर्यः | रामानुजमकालेज, दिल्लीविश्वविद्यालयः | 20 जुलाई से 03 अगस्त 2021 |
| 3. | डॉ. सत्येन्द्र यादवः | एच.आर.डी.सी., डॉ. हरि सिंह गौर | 24 जनवरी से 28 फरवरी 2022 |
| 4. | डॉ. दुर्गेशपाठकः | एच.आर.डी.सी., डॉ. हरि सिंह गौर | 01 सितम्बर से 08 सितम्बर 2022 |
| 5. | डॉ. विजय शर्मा | रामानुजमकालेज, दिल्लीविश्वविद्यालयः | 23 फरवरी से 09 मार्च 2023 |
| 6. | श्रीनितिनआर्यः | रामानुजमकालेज, दिल्लीविश्वविद्यालयः | 23 फरवरी से 09 मार्च 2023 |

7. डॉ. कुंजबिहारी रामानुजमकालेज, दिल्लीविश्वविद्यालयः
20 अक्टूबर से 18 नवम्बर 2022

8. डॉ. मधुसूदनमिश्रः ”
20 अक्टूबर से 18 नवम्बर 2022

9. श्रीनितिनआर्यः ”
20 अक्टूबर से 18 नवम्बर 2022

10 श्रीनितिनआर्यः विद्यावारिधि -उपाधये सं.सं.वि.वि., वाराणसी

**अन्ताराष्ट्रीयसम्मेलनम् संगोष्ठी च -**

प्रतिवर्षं जूनमासस्य २१ तमे दिनांके अन्ताराष्ट्रिययोगदिवस आयोज्यते। अस्मिन् योगदर्शनस्य महत्त्वम् उपलक्ष्य योगविषयकं विदुषां विशिष्टं व्याख्यानम् आयोज्यते। योगासनानां प्रशिक्षणं दीयते। अध्यापकाः छात्राः च तत्र भागं गृह्णन्ति । तेन प्रतिदिनम् अपि आसनानि सारल्येन कर्तुं प्रभवन्ति। अन्ताराष्ट्रीयसंगोष्ठ्यः अध्यापकानां छात्राणां च शास्त्रीयकौशलदक्षतायै समायोज्यन्ते। वैदेशिकाः विद्वांसः विदुष्यश्च भारतीयाः विद्वांसः विदुष्यश्च भागं गृहीत्वा विषयाणां तात्विकोद्बोधनं कुर्वन्ति। प्रथमा अन्ताराष्ट्रीयावाक्यार्थसभा काशी इतिनाम्ना समायोजितायाम् अन्ताराष्ट्रियसभायां व्याकरणमीमांसान्यायदर्शनवेदान्तदर्शनप्रभृतीनां सिद्धान्तानां तुलनात्मकविमर्शः अभवत्।

**वाक्यार्थः / शास्त्रार्थसभा -** विश्वविद्यालये वाक्यार्थसभा समायोज्यते। अस्यां समायोजितायां सभायां न्यायव्याकरणमीमांसावेदान्तबौद्धादिविषयाणां वाक्यार्थविमर्शः अध्यापकैः छात्रैश्च पूर्वपक्षोत्तरपक्षरूपेण समूहे विधीयते। शास्त्रार्थसभा अत्र प्राचीनतमा परम्परा सा सक्रिया विद्यते।

प्रतिवर्षं वाक्यप्रतियोगिता, स्फूर्तिस्पर्धा, कण्ठपाठस्पर्धा च समायोज्यन्ते। विविधेषु शास्त्रीयेषु विषयेषु स्पर्धाः संचाल्यन्ते। ताः स्पर्धाः स्थानीयस्तरे, राज्यस्तरे, राष्ट्रस्तरे च भवन्ति। छात्राः इतरच्छात्रैः सह स्पर्धित्वा स्थानीयस्तरे राज्यस्तरे च चिताः सन्तः राष्ट्रस्तरे प्रविष्टाः भवन्ति । विविधस्तरेषु भागग्रहणाय छात्राणां कृते अध्यापकाः मार्गदर्शनं कुर्वन्ति ।

**शास्त्रपरीक्षा/ शास्त्रस्पर्द्धा** - अध्यापकैः स्वसंरक्षणे शास्त्रपरीक्षा शास्त्रस्पर्द्धा च इति विषयद्वयं छात्राणां शास्त्रीयज्ञानसंवर्द्धनाय क्रियते।

**संस्कृतकविसम्मेलनम् -** विश्वविद्यालये संस्कृतकविसमवायस्य आयोजनं भवति। तत्र भारतस्य विदेशस्य च अनेके कवयः समागत्य स्वरचितकाव्यपाठं कुर्वन्ति। काव्यपाठेन नूतनान्नूतनान्विषयान्समुद्घाटयन्ति।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/2. |
| Link for additional Information अतिरिक्तसूचनानां कृते सन्धानम् | View Document (https://youtu.be/y20shpoaUYo) |

***2.4.10 Specify the names of faculty imparting indepth shastra knowledge/ Avadhana/ shastrartha to the students and encouraging them to take various shastra exams conducted by different organisations in addition to regular teaching.***

***नित्याध्यापनातिरिक्तत्वेन च्छात्राणां कृते विविधसंस्थाभिः सञ्चालितासु शास्त्रार्थपरीक्षासु स्पर्धासु च भागं ग्रहीतुं शास्त्रार्थेषु अवधानकलायां विशेषप्रशिक्षणं प्रददताम् अध्यापकानां विषये विवरणं प्रयच्छत।***

**Answer:**

**अध्ययनावकाशप्रदानं सेवारतप्रशिक्षणञ्च -** विश्वविद्यालये अध्यापकानाम् अध्ययनार्थं प्रशिक्षणार्थञ्च अवकाशः स्वीक्रियते। अभिविन्यासपुनश्चर्यापाठ्यक्रमः विद्यावारिध्युपाधिप्राप्त्यर्थञ्च विश्वविद्यालये अध्यापकानां कृते अवकाशः स्वीकृतोऽस्ति । विश्वविद्यालये अध्यापननिरतानाम् अध्यापकानां कृते विश्वविद्यालयानुदान आयोगस्य नियमानुसारम् अपेक्षितेषु सेवानिरतप्रशिक्षणेषु भागं ग्रहीतुं अवसरः कल्प्यते। ते अध्यापकाः यूजीसी.मानवसंसाधनविकासकेन्द्रद्वारा आयोज्यमाने पुनश्चर्यापाठ्यक्रमे अभिविन्यासपाठ्यक्रमे च भागग्रहणाय प्रेष्यन्ते। अध्यापकाः एतत्पाठ्यक्रमे भागं गृहीत्वा नैकानि अध्यापनकौशलानि प्राप्नुवन्ति । विश्वविद्यालये कार्यरताः अध्यापकाः पुनश्चर्यापाठ्यक्रमे, अभिविन्यासपाठ्यक्रमे अन्येषु च विभिन्नपाठ्यक्रमेषु भागम् अगृह्णन् । अत्रत्यानाम् आचार्याणां शैक्षिकरूपेण पुनर्नवीकरणाय विश्वविद्यालयेन अनेके कार्यक्रमाः समायोज्यन्ते । विश्वविद्यालयानुदान आयोगेन तथा भारतसर्वकारेण निर्धारिताः अनेके कार्यक्रमाः अध्ययनावकाशप्रदानम्, राष्ट्रियअन्ताराष्ट्रियसम्मेलने नामनिर्देशनम् सेवारतप्रशिक्षणम्, राष्ट्रिय,अन्ताराष्ट्रियसम्मेलनस्य आयोजनम् इति नैकाः व्यवस्थाः कल्पयति विश्वविद्यालयः । विश्वविद्यालये अध्यापनरतानाम् अध्यापकानां वाक्यार्थसभाः, शास्त्रार्थसभाः, शास्त्रपरीक्षाः, शास्त्रस्पर्धाः, संस्कृतकविसमवायः इत्यादयः कार्यक्रमाश्च यथावसरमवाप्य समायोजिताः भवन्ति । पारम्परिकगुरुणां सविधे अध्ययनम् - काश्यां प्राचीनेयं परम्परा यत् शिष्याः विश्वविद्यालये गुरोः गृहे च गत्वा पारम्परिकरूपेण शास्त्राध्ययनं कुर्वन्ति । गुरवः स्वजीवने प्राप्तपरम्परानुगुणं स्वशिष्येभ्यः शास्त्रीयविषयान् उपदिशन्ति। अध्ययनाय प्राप्तावकाशानाम् अध्यापकानां सूची-

**अभिविन्यासपाठ्यक्रमे** (Orientation Programme)

| क्रम संख्या | नाम | संस्था | सन् |
|---|---|---|---|
| 1. | डॉ. विजेन्द्रआर्य | रामानुजमकालेज, दिल्लीविश्वविद्यालयः | 19 जून से 18 जुलाई 2021 |
| 2. | डॉ. कुंजबिहारी | रामानुजमकालेज, दिल्लीविश्वविद्यालयः | 20 अक्टूबर से 18 नवम्बर 2022 |
| 3. | डॉ. मधुसूदनमिश्रः | ” | 20 अक्टूबर से 18 नवम्बर 2022 |
| 4. | श्रीनितिनआर्यः | ” | 20 अक्टूबर से 18 नवम्बर 2022 |

| क्रम संख्या | नाम | संस्था | सन् |
|---|---|---|---|
| 1. | डॉ. मधुसूदनमिश्रः | एच.आर.डी.सी., काशीहिन्दूविश्वविद्यालयः, वाराणसी | 27 अगस्त- 09 सितम्बर 2021 |
| 2. | डॉ. विजेन्द्रआर्यः | रामानुजमकालेज, दिल्लीविश्वविद्यालयः | 20 जुलाई से 03 अगस्त 2021 |
| 3. | डॉ. सत्येन्द्र यादवः | एच.आर.डी.सी., डॉ. हरि सिंह गौर | 24 जनवरी से 28 फरवरी 2022 |
| 4. | डॉ. दुर्गेशपाठकः | एच.आर.डी.सी., डॉ. हरि सिंह गौर | 01 सितम्बर से 08 सितम्बर 2022 |
| 5. | डॉ. विजय शर्मा | रामानुजमकालेज, दिल्लीविश्वविद्यालयः | 23 फरवरी से 09 मार्च 2023 |
| 6. | श्रीनितिनआर्यः | रामानुजमकालेज, दिल्लीविश्वविद्यालयः | 23 फरवरी से 09 मार्च 2023 |
| 7. | डॉ. कुंजबिहारी | रामानुजमकालेज, दिल्लीविश्वविद्यालयः | 20 अक्टूबर से 18 नवम्बर 2022 |

8. डॉ. मधुसूदनमिश्रः ”
20 अक्टूबर से 18 नवम्बर 2022

9. श्रीनितिनआर्यः ”
20 अक्टूबर से 18 नवम्बर 2022

10 श्रीनितिनआर्यः विद्यावारिधि -उपाधये सं.सं.वि.वि., वाराणसी

**वाक्यार्थः / शास्त्रार्थसभा -** विश्वविद्यालये वाक्यार्थसभा समायोज्यते। अस्यां समायोजितायां सभायां न्यायव्याकरणमीमांसावेदान्तबौद्धादिविषयाणां वाक्यार्थविमर्शः अध्यापकैः छात्रैश्च पूर्वपक्षोत्तरपक्षरूपेण समूहे विधीयते। शास्त्रार्थसभा अत्र प्राचीनतमा परम्परा सा सक्रिया विद्यते।

प्रतिवर्षं वाक्यप्रतियोगिता, स्फूर्तिस्पर्धा, कण्ठपाठस्पर्धा च समायोज्यन्ते। विविधेषु शास्त्रीयेषु विषयेषु स्पर्धाः संचाल्यन्ते। ताः स्पर्धाः स्थानीयस्तरे, राज्यस्तरे, राष्ट्रस्तरे च भवन्ति। छात्राः इतरच्छात्रैः सह स्पर्धित्वा स्थानीयस्तरे राज्यस्तरे च चिताः सन्तः राष्ट्रस्तरे प्रविष्टाः भवन्ति । विविधस्तरेषु भागग्रहणाय छात्राणां कृते अध्यापकाः मार्गदर्शनं कुर्वन्ति ।

**शास्त्रपरीक्षा/ शास्त्रस्पर्द्धा** - अध्यापकैः स्वसंरक्षणे शास्त्रपरीक्षा शास्त्रस्पर्द्धा च इति विषयद्वयं छात्राणां शास्त्रीयज्ञानसंवर्द्धनाय क्रियते।

**संस्कृतकविसम्मेलनम् -** विश्वविद्यालये संस्कृतकविसमवायस्य आयोजनं भवति। तत्र भारतस्य विदेशस्य च अनेके कवयः समागत्य स्वरचितकाव्यपाठं कुर्वन्ति। काव्यपाठेन नूतनान्नूतनान्विषयान्समुद्घाटयन्ति।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/2. |
| Link for additional Information अतिरिक्तसूचनानां कृते सन्धानम् | View Document (https://youtu.be/sGdrKp-yNFo) |

## 2.5 Evaluation Process and Reforms

***2.5.1 Average number of days from the date of last semester-end/ year-end examination till the declaration of results during the last five years***

***विगतपञ्चवर्षेषु, षाण्मासिक्याः वार्षिक्याः च परीक्षायाः अन्तिमदिनाङ्कात् परीक्षापरिणामघोषणादिनाङ्कं यावत् दिनानां सङ्ख्यायाः मध्यमानम् -***

**Answer:** 44.6

2.5.1.1 Number of days from the date of last semester-end/ year-end examination till the declaration of results year-wise during the last five years.

विगतपञ्चवर्षेषु, षाण्मासिक्याः वार्षिक्याः च परीक्षायाः अन्तिमदिनाङ्कात् परीक्षापरिणामघोषणादिनाङ्कं यावत् दिनानां वार्षिकसङ्ख्या।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 30 | 59 | 30 | 43 | 61 |

| File Description | Document |
|---|---|
| List of Programmes and date of last semester and date of declaration of results (Data Template) पाठ्यक्रमसूची, अन्तिमषाण्मासिक्याः दिनाङ्कः, परीक्षापरिणामघोषणदिनाङ्कश्च (दत्तांशप्रारूपम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/ |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/ |

***2.5.2 Average percentage of student complaints/ grievances about evaluation against total number appeared in the examinations during the last five years.***

***विगतपञ्चवर्षेषु, परीक्षासु सम्मिलितेषु छात्रेषु मूल्याङ्कनविषये अभियाच्ञाम्/ अभियोगं वा कृतवतां छात्राणां मध्यमानस्य प्रतिशतता।***

**Answer:** 0

2.5.2.1 Number of complaints/ grievances about evaluation year-wise during the last five years.

विगतपञ्चवर्षेषु, परीक्षासु सम्मिलितेषु छात्रेषु मूल्याङ्कनविषये अभियाच्ञाम्/ अभियोगं वा कृतवतां छात्राणां वार्षिकी सङ्ख्या।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 0 | 0 | 0 | 0 | 0 |

| File Description | Document |
|---|---|
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSF |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSF |

**_2.5.3 Average percentage of applications for revaluation leading to change in marks_**

**_पुनर्मूल्याङ्कनाय प्राप्तानाम् आवेदनानां प्रतिशतं मध्यमानस्य मानं, यत्र अङ्कानां परिवर्तनं जातम्।_**

**Answer:** 0

2.5.3.1 Number of applications for revaluation leading to change in marks year-wise during the last five years

विगतपञ्चवर्षेषु पुनर्मूल्याङ्कनाय प्राप्तानाम् आवेदनानां वार्षिकी सङ्ख्या, यत्र अङ्कानां परिवर्तनं जातम्।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 0 | 0 | 0 | 0 | 0 |

2.5.3.2 Number of revaluation applications year-wise during the last five years.

विगतपञ्चवर्षेषु पुनर्मूल्याङ्कनाय प्राप्तानाम् आवेदनानां वार्षिकी सङ्ख्या

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 0 | 0 | 0 | 0 | 0 |

| File Description | Document |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/2.5.3 |

**_2.5.4 Positive impact of reforms on the examination procedures and processes including IT integration and continuous internal assessment on the examination management system._**

**_परीक्षाप्रबन्धनप्रणाल्याः परीक्षापद्धतेः सूचनाप्रविधेश्च निरन्तरम् आन्तरिकपरीक्षणस्य च अनुकूलः प्रभावः अनुभूयते।_**

**Answer:**

विश्वविद्यालये सूचनाप्रविधिना परीक्षापद्धतेः परिष्कारेण (निरन्तरम् आन्तरिकपरीक्षणं अन्तिमसत्रार्द्धपरीक्षणं) च संस्थायाः परीक्षाप्रबन्धनसमितेः वर्धनविशिष्टम् आनुकूल्यम् आनीतम्)। पाठ्यक्रमस्य परिणामान् ज्ञातुं परीक्षापद्धतिः महत्त्वपूर्णम् अंगं विद्यते। आधुनिकेन तकनीकीमाध्यमेन विश्वविद्यालयीया परीक्षापद्धतिः छात्रेभ्यः परिणामान् प्रदातुं निरन्तरं सफला सञ्जाता। मुख्यरूपेण शास्त्रीयपाठ्यक्रमाणाम् आधुनिकपाठ्यक्रमाणां परीक्षायाः मूल्याङ्कनम् आन्तरिकपरीक्षाप्रणाल्याः आन्तरिकमूल्याङ्कनस्य च आधारेण क्रियते। विश्वविद्यालयेन शास्त्रिपाठ्यक्रमस्य परीक्षा षट्सु अधिसत्रेषु आचार्यस्य च परीक्षा चतुर्षु अधिसत्रेषु विभक्ता वर्तते ।

विश्वविद्यालयः समयबद्धरूपेण परीक्षाणाम् आयोजनं परीक्षापरिणामोद्घोषणाञ्च करोति। विद्यावारिधेः शोधप्रबन्धस्य मूल्याङ्कनमपि बाह्यपरीक्षकैः आन्तरिकपरीक्षकैश्च क्रियते। एतस्य पश्चात् वाक्प्रस्तुतेः माध्यमेन परिणामः उद्घोष्यते। परीक्षासूचनायाः प्रभृति उपाधिवितरणपर्यन्तं विश्वविद्यालयेन विधीयमाना प्रक्रिया एवं विधीयते।

**परीक्षासूचना –** विश्वविद्यालयः परीक्षासमयसारिण्याः निर्माणं कृत्वा अन्तर्जालमाध्यमेन संबद्धमहाविद्यालयान् सूचयति। संबद्धछात्राः स्वदूरभाषमाध्यमेन परीक्षायाः समयसारिण्याः अवगताः भवन्ति। एतस्याः सूचनायाः व्यापकाय प्रचाराय प्रसाराय च समस्तेषु विभागेषु समयसारिण्याः सम्प्रेषणं सूचनापट्टेषु च संश्लेषणं विधीयते।

**परीक्षावेदनपत्रम्–**परीक्षावेदनपत्रस्य परिपूर्त्तिः वाञ्छितायाः सूचनायाः आलोके सर्वे परीक्षार्थिनः अन्तर्जालमाध्यमेन परीक्षावेदनपत्रं परिपूरयन्ति। इयं प्रक्रिया पूर्णतया अन्तर्जालमाध्यमेन सम्पन्ना भवति, येन छात्राः स्वसुविधानुसारं यथेच्छस्थाने भूत्वा अपि आवेदनपत्रं पूरयितुं शक्नुवन्ति। विश्वविद्यालयः परीक्षाशुल्कमपि अन्तर्जालमाध्यमेन स्वीकरोति।

**परीक्षापरिणामः –**विश्वविद्यालयः मूल्याङ्कनोपरान्तं परीक्षापरिणामं स्वीये अन्तर्जालमुखपटले (वेबसाइट) उपारोपयति। तत्परिणाममेव च विश्वविद्यालयस्य सर्वेषु विभागेषु सूचनापट्टेषु अपि संश्लेषयति।

**उपाधिवितरणम् –** विश्वविद्यालयः सततं नवीनया आधुनिकतकनीक्याः प्रयोगेण परीक्षां पारदर्शिनीं कर्त्तुं परीक्षापरिणाममुद्घोषयितुं च सुगमां पद्धतिम् अङ्गीकरोति। वर्त्तमाने विश्वविद्यालयस्य समस्तानां परीक्षाणां परिणामः विश्वविद्यालयस्य अन्तर्जालमुखपटले उपलब्धो वर्त्तते एवञ्च 'डिजिलॉकर' माध्यमेन उपाधीन् छात्रपर्यन्तं संप्रेषणस्य कार्यं विश्वविद्यालयः करोति।

**अधिसत्रपरीक्षा –**विश्वविद्यालयः स्वपरीक्षासु नूतनशिक्षानीत्याः आलोके सततं कार्यशीलो वर्त्तते। प्रस्तुतेऽस्मिन् क्रमे विश्वविद्यालयः शास्त्रिणः पाठ्यक्रमस्य परीक्षाणां षट्सु अधिसत्रेषु आयोजनं समारब्धवान्। विश्वविद्यालयेन परीक्षापद्धतौ अन्येऽपि बहवः परिष्काराः विहिताः सन्ति। यथा–

**परीक्षासु आधुनिकतकनीक्याः प्रयोगः–**विश्वविद्यालयः स्वीयासु समस्तासु अपि परीक्षासु आधुनिकतकनीक्याः प्रयोगं करोति। परीक्षाभवने परीक्षायाः पारदर्शितया सम्पादनार्थं वीक्षणयन्त्राणां (कैमरा) समुचिता व्यवस्था विश्वविद्यालयेन विहिता वर्त्तते। परीक्षार्थिनां समुचितायाः उपवेशनव्यवस्थायाः समयबद्धतायाश्च विशेषेण ध्यानं रक्ष्यते। विश्वविद्यालयस्य 'ऑनलाइनसंस्कृतप्रशिक्षणकेन्द्रद्वारा' सर्वाः परीक्षाः अन्तर्जालमाध्यमेन कारयितुं विश्वविद्यालयोऽयं सर्वदा प्रतिबद्धोऽस्ति।

**आन्तरिकमूल्याङ्कनम्–** विश्वविद्यालयेन परीक्षासम्बन्धिनां समस्तप्रश्नपत्राणाम् अङ्काः द्वयोः भागयोः विभक्ताः सन्ति। आन्तरिकमूल्याङ्कनहेतवे 25% अङ्काः एवं सत्रीयपरीक्षायाः मूल्याङ्कनाय 75% अङ्काः निर्धारिताः सन्ति। मूल्याङ्कनस्य अनया पद्धत्या प्राप्ताङ्कप्रतिशते अभिवृद्धिर्जाता।

**भारांशपद्धतिः–** नवीनायाः शिक्षानीतेः क्रमे शास्त्रीयविषयैः सह एव अन्तर्विषयकस्य पाठ्यक्रमस्य परिणामेषु भारांशपद्धत्याः प्रयोगं विश्वविद्यालयः करोति। अनेन छात्राणाम् अङ्कपत्रस्य महत्त्वं प्रतियोगिपरीक्षादिषु संवर्ध्यते। प्रश्नपत्रनिर्माणे आवेदनपत्रपूर्त्तौ प्रवेशपत्रवितरणे आन्तरिकमूल्याङ्कने परीक्षापरिणामे उपाधिवितरणे इत्यादिषु सर्वासु गतिविधिषु आधुनिक्याः तकनीक्याः प्रयोगं कुर्वता विश्वविद्यालयेन परीक्षाप्रबंधनप्रणाली पारदर्शिनी प्रभावकारिणी च निर्मिता वर्त्तते,येन छात्राः सततं लाभान्विताः भवन्ति।

**ऑनलाइनसंस्कृतप्रशिक्षणकेंद्रम् -** अस्मिन् केंद्रे दशानां विषयाणाम् अध्यापनं सम्मानितैः वरिष्ठैः अनुभविभिः आचार्यैः क्रियते । ते दश विषयाः इमे सन्ति - भाषाशिक्षणम्, अर्चकः, कर्मकाण्डम्, ज्योतिष एवं कुण्डलीविज्ञानं, वास्तुविज्ञानं, वेदः, योगः, दर्शनं, वेदान्तः, व्याकरणं च । एतस्मिन् केंद्रे प्रवेशात् प्रभृति परीक्षा परीक्षापरिणामपर्यन्तं च सर्वा अपि प्रक्रिया अन्तर्जालस्य माध्यमेन एव क्रियते। अत्र केंद्रे त्रैमासिकः, षाण्मासिकः, वार्षिकश्च इति एवं त्रिविधः पाठ्यक्रमः वर्तते। अस्मिन् पूर्वपाठ्यक्रमे उत्तीर्णछात्रः उत्तरे पाठ्यक्रमे भागं ग्रहीतुं योग्यो भवति। यद्वा कश्चित् योग्यः छात्रः सरलम् अपि स्वेच्छया कस्मिन् अपि पाठ्यक्रमे भागं ग्रहीतुं शक्नोति । विश्वविद्यालयस्य 'ऑनलाइनसंस्कृतप्रशिक्षणकेन्द्रद्वारा' सर्वाः परीक्षाः अन्तर्जालमाध्यमेन कारयितुं विश्वविद्यालयोऽयं सर्वदा प्रतिबद्धोऽस्ति ।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/2. |
| Provide link for Additional Information अतिरिक्तसूचनानां सन्धानम् | View Document (https://ssvv.ac.in/download//C2-L/2.5.3%20Video.pdf |

***2.5.5 Status of automation of Examination division along with approved Examination Manual-***

***परीक्षाविभागस्य यान्त्रिकीकरणेन सह अङ्गीकृतायाः परीक्षामार्गदर्शिकायाः स्थितिः -***

**Answer:** B. Only student registration, Hall ticket issue & Result Process (आ. केवलं छात्राणां पञ्जीकरण-परीक्षा-प्रवेशपत्रं फलितांशप्रक्रिया च।)

| File Description | Document |
|---|---|
| Current Manual of examination automation system परीक्षा-यान्त्रिकीकरण-प्रणाल्याः अधुनातनी दर्शिका | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006 |
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006 |
| Annual reports of examination including the present status of automation (Data Template) अधुनातन्याः यान्त्रिकीकरणस्थित्या सहितं परीक्षायाः वार्षिकं वृत्तम् (दत्तांशप्रारूपम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006 |

***2.5.6 Use of Sanskrit as a medium for Question Paper setting and Answering in Examination.***

***विश्वविद्यालयः परीक्षाप्रश्नपत्राणां निर्माणे उत्तरलेखने च संस्कृतमाध्यममनुसरति।***

**Answer:**

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये संस्कृतेन प्रश्नपत्रसज्जतार्थं नीतिः तथा च संस्कृतेन उत्तरलेखनार्थं छात्राणां प्रोत्साहनाय क्रियाविधिश्च वर्तते। अयं विश्वविद्यालयः भारतीयज्ञानशाखानां शिक्षणं प्रोत्साहयति। ज्ञानशाखाः ताः वेदः, वेदांगानि, दर्शनानि, शास्त्राणि, पुराणानि, काव्यानि च भवन्ति। सर्वाः इमाः शाखाः संस्कृतभाषायाम् उपनिबद्धाः। वेदादीनां ज्ञानशाखानां सुष्ठु अवगतये संस्कृतभाषा एव आश्रयणीया। भाषान्तरे अवगमनापेक्षया मूलभाषायां सम्प्रत्ययः याथार्थ्येन भवति। अतः संस्कृतविश्वविद्यालयस्य सर्वे पाठ्यक्रमाः संस्कृतभाषायां संरचिताः सन्ति। विषयाणाम् अध्यापनं संस्कृतमाध्यमेन भवति। परीक्षायाः लेखनमाध्यमं संस्कृतभाषा देवनागरी लिपिश्च वर्तते।

विश्वविद्यालये शास्त्री, आचार्यः, शिक्षाशास्त्री इत्येतेषु नियमितपाठ्यक्रमेषु छात्राः प्रवेशं प्राप्नुवन्ति। प्रवेशपरीक्षाम् उत्तीर्य आगतेषु तेषु द्विप्रकारकाः छात्राः भवन्ति। केचन पारम्परिकपद्धत्या पूर्वकक्ष्याम् उत्तीर्य समागताः। अन्ये केचन आधुनिकपद्धत्या पूर्वकक्ष्याम् उत्तीर्य समागताः। पारम्परिकपद्धत्या अधीत्य प्रवेशं लब्धवन्तः छात्राःकक्ष्यायां संस्कृतमाध्यमेन प्रवर्त्यमानं पाठम् अवगन्तुं पारयन्ति। लेखनेन च ते परिचिताः भवन्ति। किन्तु आधुनिकपद्धत्या अधीत्य प्रवेशं लब्धवन्तः छात्राः पाठस्य अवगमने संस्कृतेन लेखने च क्लेशम् अनुभवन्ति। अतः प्रवेशसमयानन्तरं सम्भाषाशिविरं कार्यशाला च आयोज्यते। तेन भाषणे लेखने च प्राथमिकं ज्ञानं प्राप्नुवन्ति।

विश्वविद्यालयेन संचाल्यमाने शास्त्रिपाठ्यक्रमे आचार्यपाठ्यक्रमे च यथाक्रमम् - व्याकरणम्, प्राचीनव्याकरणम्, साहित्यम्, सिद्धान्तज्यौतिषम्, फलितज्यौतिषम् , सर्वदर्शनम् , धर्मशास्त्रम् , पुराणेतिहासः, वेदः, पौरोहित्यम्, जैनदर्शनम्, बौद्धदर्शनम्, सांख्ययोगः, नव्यन्यायः, प्राचीनन्यायवैशेषिकम्, मीमांसा, अद्वैतवेदान्तः इत्यादयः विषयाः वर्तन्ते। एते विषयाः संस्कृतमाध्यमेनैव पाठ्यन्ते।

शिक्षाशास्त्रिपाठ्यक्रमे आधुनिकभाषाविषयं विहाय एकं पत्रं संस्कृतभाषामाध्यमेन छात्राः पठन्ति। छात्राणां शिक्षणाभ्यासः मनोविज्ञानस्य प्रायोगिकपरीक्षा च संस्कृतभाषया एव प्रवर्त्यते। विद्यावारिधिपाठ्यक्रमे शोधरताः छात्राः शोधप्रबन्धं संस्कृतमाध्यमेन प्रस्तुवन्ति। संस्कृतभाषायां लिखितस्यैव शोधप्रबन्धस्य परीक्षणयोग्यता इति विश्वविद्यालयस्य सामान्यः नियमः वर्तते। तेषां शोधस्य मूल्यांकनं परीक्षणं च संस्कृतमाध्यमेन भवति।

एतत्तु छात्राणां गवेषणेन सह संस्कृतभाषायां विशिष्टां गतिं प्राप्तुं महान्तम् अवसरं कल्पयति। आचार्यपाठ्यक्रमात् शिक्षाशास्त्रिपाठ्यक्रमं यावत् निर्धारितः सर्वोऽपि विषयः संस्कृतवांगमये निहितानां तत्त्वानाम् अनुसन्धाने प्रवृत्तिं जनयति। संस्कृतमाध्यमेन पाठनेन इदं प्रयोजनं प्राप्तुं शक्यते। ज्ञेयः पदार्थः मूलभाषया ज्ञात एव अव्यभिचरितो भवति । पारम्परिकधारायाम् अधीत्य प्रविष्टाः छात्रा इव आधुनिकधारायाम् अधीत्य प्रविष्टानाम् अपि सुलभग्राह्यता रुचिं वर्धयति सम्भाषणपाठ्यक्रमः । असौ पाठ्यक्रमः संस्कृतेन अपरिचितेषु छात्रेषु जायमानां भीतिं निवारयति। अस्मिन् पाठ्यक्रमे शब्दकोषः, उच्चारणम्, वाक्यरचना, क्रियापदावली इत्येतेषु बिन्दुषु अवधानं दीयते। सर्वोऽपि सम्भाषणपाठ्यक्रमः पूर्णतया संस्कृतमाध्यमेन संचाल्यते । भाषणकौशलम् अधिगन्तुम् एष सरलः मार्गः । तस्मात् छात्रा अस्मिन् पाठ्यक्रमे उत्साहेन भागं गृह्णन्ति । एवं सर्वेषु स्तरेषु छात्रस्नेहिपाठ्यक्रमः संचालनीय इत्यपि विश्वविद्यालयस्य चिन्तनं वर्तते ।

इतरेभ्यः विद्यार्थिदशायां प्राप्तसम्भाषणकौशलम् अग्रिमकाले अध्यापकत्वेन नियुक्तये अध्यापनकर्मणि च बहूपकारि भविष्यति । तत् इतरेभ्यः वैशिष्ट्यं ख्यापयति। सम्प्रति प्राशासनिकविभागेषु संस्कृतं परिचाययितुं विश्वविद्यालयः कार्ययोजनां निर्माति। भविष्ये संस्कृतविश्वविद्यालयस्य सर्वेऽपि विभागाः संस्कृतसम्भाषणेन परिचिताः भविष्यन्ति। संस्कृतभाषया सम्भाषणं कर्तुं विश्वविद्यालयद्वारा सर्वेभ्यः सर्वदा प्रोत्साहनं दीयमानं वर्तते। तेन कार्यालयीयाः अपि विशिष्टां प्रेरणां प्राप्य संस्कृते सम्भाषणं कर्तुं प्रभवन्ति। अध्यापकाश्च नूनं संस्कृतसम्भाषणं कुर्युः येन परिसरीयं वातावरणं संस्कृतमयं भवति इति विश्वविद्यालयेन उद्दिष्टं वर्तते। अतः नियुक्तौ तादृशाः कुशलाः एव अध्यापकत्वेन चीयन्ते। तेन छात्राः स्वयं प्रेरिताः भविष्यन्ति। विश्वविद्यालये सरलमानकसंस्कृतमाध्यमेन शास्त्रीयविषयान् केवलं न पाठयन्ति अपितु पाठितविषयान् लेखितुम् अवसरमपि जनयन्ति। तस्मात् छात्राः संस्कृतभाषणे संस्कृतलेखने च प्रभवन्ति। अत्र शास्त्रार्थः, वाक्यार्थसभा, राष्ट्रीयसंगोष्ठी, अन्ताराष्ट्रीया संगोष्ठी, संस्कृतदिवसः प्रभृतीनाम् आयोजनं संस्कृतभाषामाध्यमेन भवति। तस्मात् छात्राः संस्कृतसंभाषणदक्षाः भवन्ति तथा च परीक्षायां संस्कृतभाषामाध्यमेन प्रश्नपत्राणि उत्तरयन्ति।

ऑनलाइनसंस्कृतप्रशिक्षणकेंद्रं विश्वविद्यालये प्रविष्टेषु छात्रेषु कश्चित् अपि छात्रः संस्कृतेनअनभिज्ञः न भवेत् एतस्य कृते विश्वविद्यालयेन सर्वकारस्य विशेषानुदानेन ऑनलाइनसंस्कृतप्रशिक्षणकेंद्रम् अपि उद्घाटितम् । एतस्य केंद्रस्य उद्घाटनम् उत्तरप्रदेशस्य सम्माननीयाभिः महनीय राज्यपालमहाभागाभिः विश्वविद्यालयस्य कुलाधिपतिभिः श्रीमतीभिः आनंदीबेनपटेलवर्याभिः विहितम्। अस्मिन् केंद्रे दशपाठ्यक्रमाणां अध्यापनं वरिष्ठाः अनुभविनः आचार्याः कुर्वन्ति । किन्तु सरलमानकसंस्कृतद्वारा विश्वविद्यालये व्यवहारः भवेत् अतः संस्कृतसंभाषणप्रशिक्षणस्य प्रकल्पः अत्र विशेषेण संचाल्यते येन देशस्य विभिन्नेभ्यः भागेभ्यः भागं ग्रहीतारः छात्राः लाभान्विताः भवन्ति ।

| File Description | Document |
|---|---|
| Upload any additional information (अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/2 |
| Upload a few answer papers of some programs written in Sanskrit. (संस्कृतमाध्यमेन लिखितोत्तराणां केषाञ्चित् पाठ्यक्रमाणां कानिचित् उत्तरपत्राणि।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/2 |
| Provide link for Additional Information (अतिरिक्तसूचनानां सन्धानम्) | View Document (https://ssvv.ac.in/download/C2-L/2.5.5.pdf) |

**2.6 Student Performance and Learning Outcomes**

***2.6.1 Programme outcomes, Programme specific outcomes and course outcomes for all Programmes offered by the institution are stated and displayed on website and communicated to teachers and students.***

***संस्थाद्वारा परिचालितानां सर्वेषां पाठ्यक्रमाणां परिणामाः, पाठ्यक्रमाणां विशिष्टपरिणामाः,पाठ्यपत्राणां परिणामाः च संस्थाजालस्थाने निर्दिश्यन्ते, प्रदर्श्यन्ते च, छात्राणां शिक्षकाणां च कृते प्रेष्यन्ते।***

**Answer:**

विश्वविद्यालयद्वारा अधिगमपरिणामाः (विशिष्टाः निर्दिष्टाश्च कार्यक्रमाः)/ स्नातकोपाधिधारिणां परीक्षणपद्धतिसमन्विताः शैक्षिकगुणोपलब्धयः व्यापकप्रचारार्थं संस्थायाः जालस्थाने अन्येषु प्रपत्रेषु च निर्दिष्यन्ते। विश्वविद्यालये स्वीकृतानां सर्वेषां पाठ्यक्रमाणां निर्धारितसमयानुगुणं परीक्षाः भवन्ति। तासां परीक्षाणां परिणामाः छात्राणां सौकर्याय आधुनिकपद्धत्या अन्तर्जालमाध्यमेन प्रकाश्यन्ते। प्रकाशितानां परिणामानाम् अवलोकनं छात्राः दूरभाषयन्त्रमाध्यमेन कर्तुं प्रभवन्ति। अन्तर्जालस्थाने परिणामानां प्रकाशनस्य विश्वविद्यालयद्वारा विशिष्टा प्रक्रिया अंगीकृता विद्यते। सर्वछात्रसौविध्यम् आकलय्य विश्वविद्यालयः स्वसूचनापटलेषु परिणामान् संश्लेषयति। उपाधीनाम् अवाप्त्यर्थं डिजिलॉकरमाध्यमेन आधुनिकी व्यवस्था कृता विद्यते। अनया व्यवस्थया छात्राः सन्तुष्टाः भवन्ति। तेषाम् उपाधिप्राप्त्यर्थं समयव्यय अपि न जायते। उपाधौ कदाचित् लेखनत्रुटिः संजायते तदा तस्याः त्रुटेः समाधानार्थं निःशुल्का व्यवस्था वर्षपर्यन्तं विद्यते येन छात्राः तुष्टाः दृश्यन्ते। विश्वविद्यालयेन शास्त्री-आचार्य-विद्यावारिधि-शिक्षाशास्त्री-डिप्लोमा-प्रमाणपत्रीयपाठ्यक्रमाः संचाल्यन्ते। विश्वविद्यालयस्य इमे सर्वेऽपि पाठ्यक्रमाः बहुमुखिनः वर्तन्ते। पाठ्यक्रमस्य धाराद्वयम् एकं

शास्त्रीयम् अपरम् आधुनिकं च वर्तते । शास्त्रीयपाठ्यक्रमे अस्माकं प्राच्यमौल्यप्रतिपादकानि तथ्यानि आधुनिकपाठ्यक्रमे च साम्प्रतिकाः विषयाः निर्धारिताः सन्ति ये छात्रेभ्यः अध्येतृभ्यश्च उपयोगिनः तोषजनकाश्च विद्यन्ते। एवं पाठ्यक्रमः सर्वतोमुखी विद्यते। परीक्षासम्बद्धनियमाः विश्वविद्यालयस्य प्रकाशनविभागेन प्रकाशिताः सन्ति। व्यापकप्रचाराय प्रसाराय च ते नियमाः विश्वविद्यालयस्य अन्तर्जालमुखपटले स्थापिताः सन्ति। छात्राः विश्वविद्यालयेन सह सम्पर्कं विना अपि दूरभाषमाध्यमेन द्रष्टुं प्रभवन्ति। परीक्षायाः तिथिसारणी विश्वविद्यालयेन अन्तर्जालमाध्यमेन अपि प्रकाश्यते तथा च सूचनापटलेऽपि प्रदर्श्यते। प्रतिविभागं महाविद्यालयेषु च ईमेलमाध्यमेन संप्रेष्यते। विश्वविद्यालयेन सर्वेषां पाठ्यक्रमाणां परीक्षापरिणामः पारदर्शिरूपेण आधुनिकयन्त्रसहयोगेन समयबद्धरूपेण उद्घोष्यते।

विश्वविद्यालयस्य अध्ययनपरिषत् संकायपरिषद् विद्यापरिषत् च पाठ्यक्रमाणां निर्धारणं करोति। विश्वविद्यालयस्य माननीयेन कुलपतिना सह विमृश्य इमाः परिषदः तान् पाठ्यक्रमान् निर्धारयन्ति। परिषदि विश्वविद्यालयस्य अन्यविश्वविद्यालयानां च आचार्याः सदस्यत्वेन भवन्ति। शैक्षिकविभागः कार्यपरिषदः पुरस्तात् प्रस्तावं करोति। एवं विविधस्तरेषु अनुशीलनं अनुमोदनपुरस्सरं निर्धारिताः पाठ्यक्रमाः विश्वविद्यालयस्य अन्तर्जालस्थाने प्रकाश्यन्ते। विश्वविद्यालयस्य शैक्षिकविभागः पाठ्यक्रमाणां परिणामान् विशिष्टपरिणामांश्च परिशीलयति। समये समये स्वीक्रियमाणया योजनया परिणामेषु गुणाः लक्ष्यन्ते। ततः अन्यासां शैक्षिकयोजनानां क्रियान्वयने उत्साहः वर्धते।

विश्वविद्यालयस्य ध्येयोद्देष्यानुगुणं पाठ्यक्रमाः निर्धार्यन्ते। नानाक्षेत्रेषु उद्योगप्राप्तये एते पाठ्यक्रमाः सहकारिणः भवन्ति। शास्त्रिपाठ्यक्रमस्य अर्हताधारेण विविधाः उद्योगावसराः लभ्यन्ते। वित्तकोषः,भारतीयरेल्वे, राज्यनागरिकसेवा, केन्द्रीयनागरिकसेवा, भारतीयपोस्टविभागः इत्यादीनां प्रवेशपरीक्षां लेखितुम् अर्हता प्राप्यते। अन्यविश्वविद्यालयानां पदवीधरैः सह सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य पदवीधराः समानावसरं लभमानाः सन्ति। बहवः उक्तेषु औद्योगिकक्षेत्रेषु वृत्तिम् अलभन्त। वास्तुज्योतिषस्य योगविज्ञानस्य च डिप्लोमापाठ्यक्रमाः कौशलाधारिताः वर्तन्ते। तेन प्राप्तपदवीकानां स्वतन्त्रतया उद्योगं कर्तुं दक्षता विश्वासश्च सिद्ध्यति। असौ विश्वविद्यालयस्य पाठ्यक्रमाणां साक्षात् परिणामः वर्तते। विश्वविद्यालयस्य पाठ्यक्रमेषु प्राचीनया विद्यया सह आधुनिकायाः विद्याया अपि समन्वयः वर्तते। संस्कृतपदवीधराः आंग्लभाषायाम् अपि निपुणाः सन्तः विदेशेषु संस्कृतप्रचारकार्यं कर्तुम् उत्सहन्ते। एवं ते भारतस्य सांस्कृतिकप्रतिनिधित्वेन आत्मानं व्यापारयितुं संकल्पन्ते। विश्वविद्यालयस्य पारदर्शिनी नीतिः छात्रप्रिया शास्त्रप्रिया च वर्तते। शैक्षिककार्याणां सर्वाः सूचनाः विश्वविद्यालयस्य भित्तौ प्रकाश्यन्ते। ताः सूचनाः अध्यापकैः अभिभावकैश्च सुलभतया अनुसर्तुम् एष उपक्रमसौविध्यं कल्पयति। एवं पाठ्यक्रमाणां परिणामाः हस्तामलकीक्रियन्ते।

| File Description | Document |
|---|---|
| Upload POs, PSOs, COs for all courses सर्वेषां पाठ्यक्रमाणां परिणामाः पाठ्यक्रमाणां विशिष्टपरिणामाः, पाठ्यपत्राणां परिणामाः च संस्थाजालस्थाने उपारोपणीयाः। | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/ |
| Upload a description of Mechanism of Communication सम्प्रेषणकार्यतन्त्रस्य विवरणम् उपारोपणीयम्। | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/ |

| | |
|---|---|
| Provide the URL जालस्थानसन्धानं निर्दिशन्तु | View Document (https://ssvv.ac.in/download/c2-new/All%20PSO.pdf |

***2.6.2 Attainment of Programme outcomes, Programme specific outcomes and course outcomes are evaluated by the institution***

***एतेषां सर्वेषां पाठ्यक्रमपरिणामानां, पाठ्यक्रमविशिष्टपरिणामानां, पाठ्यपत्रपरिणामानां निष्पत्तीनां च मूल्याङ्कनं संस्था करोति।***

**Answer:**

एतेषां सर्वेषां कार्यक्रमपरिणामानां, कार्यक्रमविशिष्टपरिणामानां, पाठ्यक्रमपरिणामानां निष्पत्तीनां च मूल्यांकनं विश्वविद्यालयः करोति। विश्वविद्यालयस्य शास्त्रीयपाठ्यक्रमाः भारतीयज्ञानपरम्पराश्रिताः विद्यन्ते। आधुनिकपाठ्यक्रमाः आधुनिकज्ञानसम्मिश्रिताः एवं विश्वविद्यालयस्य पाठ्यक्रमेषु प्राच्यज्ञानबिन्दवः आधुनिकज्ञानबिन्दवश्च बिम्बिताः सन्ति। एतेषां सर्वेषां पाठ्यक्रमाणां निर्माणविषयसंयोजनं, परिणामानां मूल्यांकनं, निर्माणस्य औचित्यम् एतत् सर्वं समीक्ष्य पाठ्यक्रमस्य अध्यापनार्थं स्वीकृतिः प्रदीयते। अध्यापकाः शास्त्रीयविषयाणां यथा -

| | | | |
|---|---|---|---|
| 1. | ऋग्वेदः | 1. | शांकरवेदान्तः |
| 1. | शुक्लयजुर्वेदः | 1. | रामानुजवेदान्तः |
| 1. | कृष्णयजुर्वेदः | 1. | मध्ववेदान्तः |
| 1. | सामवेदः | 1. | निम्बार्कवेदान्तः |
| 1. | अथर्ववेदः | 1. | गौडीयवेदान्तः |
| 1. | वेदनैरूक्तप्रक्रिया | 1. | वल्लभवेदान्तः |
| 1. | पौरोहित्यम् | 1. | रामानन्दवेदान्तः |
| 1. | नव्यव्याकरणम् | 1. | शक्तिविशिष्टाद्वैतवेदान्तः |
| 1. | प्राचीनव्याकरणम् | 1. | दर्शनम् |
| 1. | गणितम् | 1. | तुलनात्मकधर्मम् |
| 1. | फलितज्यौतिषम् | 1. | तुलनात्मकदर्शनम् |
| 1. | सिद्धान्तज्यौतिषम् | 1. | सांख्ययोगम् |
| 1. | धर्मशास्त्रम् | 1. | आगमः |
| 1. | साहित्यम् | 1. | योगतन्त्रम् |
| 1. | पुराणेतिहासः | 1. | बौद्धदर्शनम् |
| 1. | प्राचीनराजशास्त्रार्थशास्त्रम् | 1. | जैनदर्शनम् |
| 1. | प्राचीनन्यायवैशेषिकम् | 1. | प्राकृत एवं जैनागमः |
| 1. | नव्यन्यायः | 1. | पालि |
| 1. | पूर्वमीमांसा | 1. | संस्कृतविद्या |

इत्यादीनां मूल्यांकनमपि यथावसरं विदधति।

**पाठ्यक्रमस्य परिचयप्रदानम् -** प्रवेशकालेव्याकरणम्, साहित्यम्, ज्योतिषम्, वेदान्तः इत्यादीनां पाठ्यक्रमगतानां वैकल्पिकानां शास्त्रविषयाणां सामान्यपरिचयः क्रियते। सम्बद्धपाठ्यक्रमस्य समितेः सदस्याः तत्कार्यं सम्पादयन्ति। छात्रेण चीयमानस्य पाठ्यक्रमस्य पाठ्यपत्राणामपि परिचयः क्रियते।पाठ्यक्रमाणां विशिष्टं प्रयोजनं किमित्यपि उच्यते।

**पाठ्यांशपूर्णम्-** अध्यापकेन निर्दिष्टसमये पाठ्यांशः समापनीयः अतः प्रत्येकविषयस्य अध्यापकेन पाठ्यपत्रे प्रतिमासं पाठनीयस्य अंशस्य विभागः क्रियते । मासे मासे निर्दिष्टः पाठ्यांशः पूर्यते तेन समये पाठ्यांशपूरणं सम्भवति। पुनरवलोकनं परीक्षासिद्धता च तत्र कर्तुं सौविध्यं वर्तते।

**उपस्थितिः-** कक्ष्याध्यापने छात्राणामुपस्थितिः पाठ्यक्रमस्य परिणामं निर्धारयति। प्रतिशतं पञ्चसप्ततिः उपस्थितिः न्यूनतमत्वेन अपेक्षिता परीक्षायाम् उपवेशनाय।

**प्रदत्तकार्यनिरीक्षणम्-** छात्राः निर्दिष्टे पाठ्यविषये पीपीटीद्वारा विषयोपस्थापनमग्रन्थानाम् आवलीनिर्माणम्, लघुसमीक्षा इत्यादीनि कार्याणि कुर्वते।

**अतिरिक्तकक्ष्याः-** आन्तरिकमूल्याङ्कनेन छात्राणां क्रमितमापनं भवति। सामन्यतया ते मन्दाध्येतारः, मध्यमाध्येतारः, अग्रेसराध्येतारः इति विभक्ताः भवन्ति ।

**सत्रीयपरीक्षाः.-** छात्राणां परीक्षाफलेन पाठ्यक्रमाणां गुणः निर्धार्यते। विश्वविद्यालयद्वारा परीक्षा, मूल्याङ्कनम्, फलितांशस्य पट्टिकानिर्माणम्, तस्य घोषणा, अड्कतालिकाप्रदानं च क्रियते। एताभिः अवान्तरक्रियाभिः पाठ्यक्रमाणां परिणामाः ज्ञातुं शक्यन्ते। सञ्चालितेषु पाठ्यक्रमेषु अन्ते **सत्रीयपरीक्षाः** समचाल्यन्त। ततः प्रथमद्वितीया द्व्याः श्रेण्यः निर्धारिताः।

**नियुक्तिः-** विश्वविद्यालये पाठ्यक्रमं समाप्य प्राप्तपदवीका विभिन्नेषु क्षेत्रेषु वृत्तिं लभन्ते शिक्षाशास्त्रिपाठ्यक्रमं समाप्तवन्तः विविधराज्येषु पाठशालासु वृत्तिम् अलभन्त। केचन वित्तकोषे आजीविकाः अप्राप्नुवन्। अन्ये नागरिकसेवादिषु आत्मानं व्यापारयितुं प्रेरणांमलभन्त। NET, CTET इत्यादिपरीक्षाः उत्तीर्णाः । बहवः योगः, वास्तु, ज्योतिष इत्यादीन्कोशलाधारितपाठ्यक्रमान् समाप्य स्वयमुद्योगम् आरब्धवन्तः । विश्वविद्यालयस्य नैके छात्राः सेनायां धर्मगुरुपदं समारूढाः ।

**विशिष्टय उपलब्धयः-**. विश्वविद्यालयस्य छात्रः श्रीमान् भाष्करतिवारी भारतस्य समस्तेषु केंद्रीयेषु विश्वविद्यालयेषु परास्नातककक्षायां प्रवेशहेतवे संजातायां परीक्षायां संस्कृतविषये सम्पूर्णभारते सर्वप्रथमं स्थानं लब्ध्वा विश्वविद्यालयं गौरवान्वितम् अकरोत्। विश्वविद्यालयस्य एव अपरः छात्रः दीपकवत्सः अपि कला एवं संस्कृनिमंत्रालयद्वारा ;भारत सरकारद्वारा राष्ट्रीयपुरस्कारेण चतुर्लक्षस्य सम्मानराशिना च सम्मानिनः। छात्राय दीपकवत्साय अयं पुरस्कारः तस्य 'मैं बिहार हूँ' इति मैथिलभाषायां लिखितायै कृतये लब्धः । विश्वविद्यालयस्य एतस्य छात्रस्य दीपकवत्सस्य चर्चा माननीयेन प्रधानमंत्रिणा श्रीनरेद्रदामोदरदासमोदिमहाभागैः अपि स्वकीये 'मन की बात' इति कार्यक्रमे विहिता। दीपकः युवलेखकः वर्तते देशभक्तेः गीतानां लेखनं एतस्य छात्रस्य महती विशेषता वर्तते।

विश्वविद्यालयेन पाठ्यक्रमाणां परिणामानां निष्पत्तेश्च मापनं विहितम्।अत्र शास्त्री, आचार्यः, शिक्षाशास्त्री, विद्यावारिधिः, प्रमाणपत्रम् इत्येते पाठ्यक्रमाः सञ्चालिताः। एते पाठ्यक्रमाः निर्दिष्टोद्देश्यैः सह प्रवर्तिताः।उद्देश्यानुगुणं तेषां क्रियान्वयार्थं कार्याणि व्यधीयन्त। प्रवेशकाले दत्तेन शास्त्रीयाणां पाठ्यक्रमाणां परिचयेन छात्राः विविधेषु शास्त्रेषु विभक्ताः अभवन्। शिक्षाशास्त्रिपाठ्यक्रमे मनोविज्ञानादिना अन्तरितमापनं भवति। पाठ्यक्रमेषु प्रतिसत्रं सत्रीयपरीक्षाप्राप्तं फलं वीक्ष्य आनुपातिकमापनं विहितम्। तेन पाठ्यक्रमे परिवर्तनं परिवर्धनं च कर्तुं चिन्तनं सम्पन्नम्।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/2. |

| | |
|---|---|
| Provide link for Additional Information अतिरिक्तसूचनानां सन्धानम् | View Document (https://ssvv.ac.in/download/c2-new/All%20PSO.pdf) |

***2.6.3 Average pass percentage of students***

***छात्राणाम् उत्तीर्णताप्रतिशततायाः मध्यमानम्***

**Answer:** 94.27

2.6.3.1 Total number of final year students who passed the university examinations

विश्वविद्यालयस्य परीक्षासु उत्तीर्णानाम् अन्तिमवर्षीयाणां छात्राणां सङ्ख्या

Answer: 263

2.6.3.2 Total number of final year students who appeared for the examinations

अन्तिमवर्षपरीक्षासु सम्मिलितानां छात्राणां योगः

Answer: 279

| File Description | Document |
|---|---|
| Upload list of Programmes and number of students passed and appeared in the final year examination (Data Template) पाठ्यक्रमसूची, परीक्षायाम् उत्तीर्णानां छात्राणां सङ्ख्या, आन्तिमवर्षपरीक्षायां सम्मिलितानां छात्राणां योगः च उपारोपणीयाः(दत्तांशप्रारूपम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/ |
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/ |
| Provide link for the annual report वार्षिकप्रतिवेदनस्य सन्धानम्। | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/ |

***2.6.4 The Institution has mechanism to evaluate the performance of students through the vakyartha/ shastrartha-Sabhas, Shalaka-Pareeksha, Shastra-Pareeksha (Oral), Shastra-spardha, Writing Sanskrit-Slokas/ Padya/ Poetry etc.***

***संस्था वाक्यार्थ/शास्त्रार्थसभा-शलाकापरीक्षा-शास्त्रपरीक्षा(मौखिकं)-शास्त्रस्पर्धा-संस्कृतश्लोक-पद्य-काव्यादिभिः छात्राणां प्रस्तुतेः मूल्याङ्कनार्थं किमपि कार्यतन्त्रमनुसरति।***

**Answer:**

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये वाक्यार्थ / शास्त्रार्थसभा, शलाकापरीक्षा, शास्त्रपरीक्षा, शास्त्रस्पर्धा संस्कृतश्लोक, पद्यकाव्यादिभिः छात्राणां प्रस्तुतेः मूल्यांकनार्थं क्रियाविधिः वर्तते। अयं विश्वविद्यालयः प्राचीनपरम्परायाः तत्सम्बद्धवाङ्मयस्य च परिपोषको वर्त्तते। अतः संस्कृतवाङ्मयस्य रक्षायै तत्र निगूढानाम् अर्थानां च स्पष्टीकरणार्थं येऽपि विधयो भवन्ति तान् सर्वान् विधीन्विश्वविद्यालयः यथावत्परिपालयति। अस्मिन्विश्वविद्यालये विभागीयस्तरे, सङ्कायस्तरे, विश्वविद्यालयस्तरे, राज्यस्तरे, राष्ट्रीयस्तरे च वाक्यार्थसभायाः, शास्त्रार्थसभायाः, शलाकापरीक्षायाः, शास्त्रपरीक्षायाः, शास्त्रस्पर्धायाः, संस्कृतश्लोकनिर्माणस्य, संस्कृतपद्यनिर्माणस्य, संस्कृतकवितालेखनस्य च माध्यमेन छात्राणां प्रदर्शनस्य मूल्याङ्कनस्य व्यवस्था वर्त्तते। यथा –

**वाग्वर्धिनीपरिषद् -** विश्वविद्यालये शास्त्रपंक्तीनां वाक्यानां च निगूढम् अर्थम् उद्घाटयितुं प्रचाल्यमानेषु बहुविधप्रकल्पेषु वाक्यार्थसभा अपि एकः प्रकल्पो भवति। विभागीयस्तरे प्रतिसप्ताहं वाग्वर्धिनीपरिषदः आयोजनं क्रियते। अस्यां वाग्वर्धिनीपरिषदि कञ्चिद्विषयविशेषं स्वीकृत्य छात्राः व्याख्यानं ददति।

**वाक्यार्थसभा –** राज्यस्तरे, राष्ट्रीयस्तरे, अन्ताराष्ट्रीयस्तरे च वाक्यार्थसभायाः आयोजनं भवति। तत्र विश्वविद्यालयीयाः छात्राः भागं गृह्णन्ति । तत्र शास्त्रस्य कस्यचिद्वाक्यस्य सामान्यमर्थमुक्त्वा पुनस्तत्र वाक्ये निगूढोऽर्थः आचार्यैः समुद्घाट्यते। बहुकृत्वा अत्र विश्वविद्यालये वाक्यार्थसभायाः आयोजनं भवति सञ्जातमपि च। प्रथमा अन्ताराष्ट्रीया वाक्यार्थसभा अपि विश्वविद्यालयेन आयोजिता।

**शास्त्रार्थसभा -** विश्वविद्यालये छात्राणाम् आचार्याणां च हिताय शास्त्रार्थसभायाः व्यवस्था अपि प्रकल्पिता विद्यते। तत्र छात्राः आचार्याश्च सोत्साहं भागं गृह्णन्ति। 2019 तमे ख्रीष्टाब्दे विश्वविद्यालयेन अखिलभारतीयशास्त्रार्थसम्मेलनस्य आयोजनं कृतम्। तत्र सम्पूर्णाद्भारतात्प्रायशः पञ्चाशता विद्वद्भिः विभिन्नेषु विषयेषु शास्त्रार्थः कृतः । अस्यां शास्त्रार्थसभायां किंचित्प्रकरणविशिष्टम् आश्रित्य चर्चा, संवादः वादविवादश्च भवन्ति।

**शलाकापरीक्षा -** छात्राणां बुद्धिविकासाय अस्मिन्विश्वविद्यालये यथावसरं शलाकापरीक्षायाः अपि आयोजनं भवति। तत्रापि छात्राः उत्साहेन भागं गृहीत्वा प्रोत्साहनं पुरस्कारञ्च प्राप्नुवन्ति। अस्यां प्रतियोगितायां किमपि शास्त्रं शास्त्रस्य प्रकरणविशेषं वा आश्रित्य परीक्षा समायोज्यते। तत्र निर्धारितशास्त्रीयपुस्तके एका धातुनिर्मिता शलाका दीयते। पुस्तके यत्रापि शलाका प्रविशति ततः पृष्ठादेव प्राश्निकाः प्रश्नं कुर्वन्ति। तदेवमग्रेपि क्रमः चलति।

**शास्त्रपरीक्षा -** विश्वविद्यालयेनानेन छात्राणां बुद्धिवर्धापनाय क्रियमाणेषु प्रकल्पेषु शास्त्रपरीक्षायाः अपि आयोजनं क्रियते। तत्र शास्त्रपरीक्षायां छात्राः कस्यापि विषयस्य ग्रन्थस्य स्मरणं तदर्थबोधनं च कुर्वन्ति । पुनस्तस्माद् ग्रन्थात्तद्विषयविशेषज्ञाः प्रश्नान्कुर्वन्ति । एवं शास्त्रसंरक्षणे अस्याः शास्त्रपरीक्षायाः भूयो योगदानं भवति। दक्षिणभारते आयोज्यमानायां तेनालीपरीक्षायामपि अस्य विश्वविद्यालयस्य छात्राः सोत्साहं भागमगृह्णन्गृह्णन्ति च।

**शास्त्रस्पर्द्धा -** माननीयः प्रधानमन्त्री मोदिमहोदयोऽपि 'परीक्षा पे चर्चा' इतिकार्यक्रमान्तर्गतं बहुकृत्वा उक्तवान्यत् स्वस्था सकारात्मिका च स्पर्द्धा सर्वदैव अस्माकं कृते लाभप्रदायिनी भवति। अतः अयं विश्वविद्यालयोऽपि यथासमयं शास्त्रस्पर्द्धानाम् आयोजनं कारयति। वाक्यार्थसभा, शास्त्रार्थसभा, श्लाकापरीक्षा, शास्त्रपरीक्षा चेत्यादयो भागांशाः अपि शास्त्रस्पर्द्धायाः अङ्गेषु गृह्यन्ते। तथापि कक्षास्तरे बुद्धिस्तरे वा विभिन्नानि शास्त्राणि आश्रित्य आयोज्यमाना स्पर्द्धा शास्त्रस्पर्द्धा भवति यत्र अत्रत्याः छात्राः महत्या रुच्या भागं गृहीत्वा साफल्यं लभन्ते ।

**संस्कृतश्लोक /पद्य / कवितालेखनम् -** संस्कृते विद्यमानेषु काव्यग्रन्थेषु प्रचलितानां विषयाणां रसास्वादनाय यद्वा साम्प्रतिककाले प्रचलितान्विषयान् आश्रित्य मनोरञ्जनम् आवोढुं संस्कृतश्लोकमाध्यमैः काव्यसंगोष्ठीनामपि आयोजनम् अपि अत्र विश्वविद्यालये भवति। संस्कृतसप्ताहान्तर्गतमपि संस्कृतश्लोकान्त्याक्षर्याः आयोजनमत्र विश्वविद्यालये भवति। पंडित विद्यानिवासमिश्राणां पुण्यतिथावपि संस्कृतकविसंगोष्ठयाः आयोजनम् अस्मिन्विश्वविद्यालये सञ्जातम्। एवं हि लब्धावसरेण अनेन विश्वविद्यालयेन नैकाः काव्यसंगोष्ठयः नैकानि कविसम्मेलनानि च समायोज्यन्ते। छात्राणां कृतेऽपि च एतासु संगोष्ठीषु स्वकाव्यकौशलं प्रदर्शयितुं भूयान् अवसरो भवति। अस्य विश्वविद्यालयस्य छात्राः संस्कृतकाव्यकर्मणि संस्कृतकवितालेखने च दक्षाः भवेयुरिति अध्यापकैः तेषाङ्कृते संस्कृतश्लोकनिर्माणस्य संस्कृतकवितालेखनस्य च प्रशिक्षणं दीयते। संस्कृतेन सहैव अन्यासु भाषासु अपि अत्रत्यानां छात्राणां लेखनी काव्यकरणाय सर्वदैव स्फुरति। अस्य विश्वविद्यालयस्य छात्राः दीपकवत्सः

'मैं बिहार हूँ' इति काव्यपुस्तकस्य कृते भारतसर्वकारस्य संस्कृतिमंत्रालयेन पुरस्कृतोऽपि वर्त्तते। माननीयनप्रधानमन्त्रिणा मोदि महाभागेनापि 'मन की बात' इति कार्यक्रमान्तर्गतम् एतस्य छात्रस्य चर्चा कृता अयं च छात्रः चतुर्लक्षरूप्यकैः सभाजितोऽपि।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/2. |
| Provide link for Additional Information अतिरिक्तसूचनानां सन्धानम् | View Document (https://ssvv.ac.in/download/c2-new/Publication1%20- |

### 2.7 Student Satisfaction Survey

***2.7.1 Online student satisfaction survey regarding teaching learning process.***

***अध्यापन-अधिगमयोः प्रक्रियाविषये अधितन्त्रि छात्रसन्तुष्टेः सर्वेक्षणम्।***

**Answer:** 3.55

## 3.Research, Innovations and Extension

### 3.1 Promotion of Research and Facilities

***3.1.1 The institution has a well defined policy for promotion of research and Research Committee to monitor and address issues related to research and the same is uploaded on the institutional website. (Yes /No)***

***संस्थायाम् अनुसन्धानस्य प्रोन्नत्यै सुचारुनिर्दिष्टा योजना अस्ति। अनुसन्धानस्य समस्यानां निराकरणाय, अनुसन्धानस्य प्रगतेः संवीक्षणाय अनुसन्धानसमितिः अस्ति। तत्सर्वं संस्थायाः जालस्थाने स्पष्टतया उपारोपितम्। (आम् /न)***

**Answer:** Yes

| File Description | Document |
|---|---|

| | |
|---|---|
| Minutes of the the Research Committee/ Academic Council/ Governing Council/ Syndicate/ Board of Management related to research promotion policy adoption | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/3.1. |
| Institutional data in prescribed format | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/3.1. |
| Any additional information | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/3.1. |
| URL of Policy document on promotion of research uploaded on website | View Document (https://www.ssvv.ac.in/download/2024/research/Resea compressed.pdf) |

***3.1.2 The institution provides seed money for in-depth Shastric training/ inter-disciplinary training to its teachers for research during the last five years***

***विगतपञ्चवर्षेषु संस्था अध्यापकेभ्यः अनुसन्धानाय तलस्पर्शिशास्त्रप्रशिक्षणाय अन्तःशास्त्रीयप्रशिक्षणाय च मूलनिधिं ददाति।***

**Answer:** 0.11

3.1.2.1 The amount of seed money provided by institution to its faculty year-wise during the last five years (INR in lakhs)

संस्थया विगतपञ्चवर्षेषु अध्यापकेभ्यः प्रदत्तस्य मूलनिधेः वार्षिकसङ्ख्या (लक्षशः)।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 0.09920 | 0.19514 | 0.26868 | 00 | 00 |

| File Description | Document |
|---|---|

| | |
|---|---|
| Minutes of the relevant bodies of the University (विश्वविद्यालयस्य योग्यनिकायस्य कार्यवृत्तम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006 |
| List of teachers receiving grant and details of grant received (Data Template) (प्राप्तानुदानविवरणेन सह अनुदानं प्राप्तवताम् अध्यापकानां सूची। (दत्तांशप्रारूपम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006 |
| Budget and expenditure statements signed by the Finance Officer indicating seed money provided and utilized (विश्वविद्यालयस्य वित्ताधिकारिणा हस्ताक्षरितं मूलनिधेः प्राप्तराशेः व्ययीकृतराशेश्च सूचकम् आयव्ययपत्रकं व्ययपत्रकं च। ) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006 |

***3.1.3 Number of JRFs, SRFs, Post Doctoral Fellows, Research Associates and any other research fellowships in the University enrolled during the last five years.***

***विश्वविद्यालये विगतपञ्चवर्षेषु पञ्जीकृतानां कनिष्ठशोधच्छात्राणां(JRF) वरिष्ठशोधच्छात्राणां (SRF) शोधोत्तरानुसन्धातृणाम् (PDF) अनुसन्धानसहायकानाम् अन्येषां च अनुसन्धातृणां सङ्ख्या-***

**Answer:** 14

3.1.3.1 The Number of JRFs, SRFs, Post Doctoral Fellows, Research Associates and other research fellows in the university enrolled year-wise during the last five years

विश्वविद्यालये विगतपञ्चवर्षेषु पञ्जीकृतानां कनिष्ठशोधच्छात्राणां(JRF) वरिष्ठशोधच्छात्राणां (SRF) शोधोत्तरानुसन्धातृणाम् (PDF) अनुसन्धानसहायकानाम् अन्येषां च अनुसन्धातृणां वर्षक्रमेण सङ्ख्या-

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|

| | | | | |
|---|---|---|---|---|
| 05 | 0 | 0 | 02 | 07 |

| File Description | Document |
|---|---|
| List of research fellows and their fellowship details (Data Template) (अनुसन्धातॄणां सूची, छात्रवृत्तिविवरणञ्च। (दत्तांशप्रारूपम्)) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/3 |
| Any additional information( अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/3 |

***3.1.4 University has the following facilities***

***1. Central Instrumentation Centre/ Language Laboratory ComputerLab/ ICT Lab***

***2. Museum***

***3. Studios/ Recording Studio for Audio-Video/ e-P.G.Pathashala Facilities***

***4. Research/ Statistical Databases***

***5. Manuscript Resource Centre (MRC)***

***6. Manuscript Conservation Centre(MCC)***

***7. Yoga Training Centre***

***8. Yoga Therapy Centre with modern equipments***

***9. Observatory/ Yajnashala***

***10. Psychology Laboratory***

***विश्वविद्यालये अधोलिखितानि सौविध्यानि सन्ति-***

***1. केन्द्रीयम् उपकरणकेन्द्रम्/ भाषाप्रयोगशाला/ सङ्गणकप्रयोगशाला/ सूचना-सम्प्रेषण -प्रविधिप्रयोगशाला***

***2. पुरातत्त्वसङ्ग्रहालयः***

***3. दृश्य-श्रव्य-सामग्रीनिर्माणाय चित्राङ्कनशालायाः ध्वन्यङ्कनशालायाः ई.पी.जी पाठशालायाः वा सौविध्यानि***

***4. अनुसन्धानम्/ सांख्यकीयो दत्तांशनिधिः***

***5. पाण्डुलिपिसंसाधनकेन्द्रम्***

***6. पाण्डुलिपिसंरक्षणकेन्द्रम्***

***7. योगप्रशिक्षणकेन्द्रम्***

***8. आधुनिकयन्त्रसहितं योग-उपचारकेन्द्रम्***

***9. वेधशाला/ यज्ञशाला***

***10. मनोविज्ञानप्रयोगशाला***

**Answer:** A. Any six facilities exist (अ. उपर्युक्तेषु कानिचित् षट्सौविध्यानि सन्ति)

| File Description | Document |
|---|---|
| Upload the list of facilities provided by the university and their year of establishment (Data Template) (विश्वविद्यालयेन दत्तानां सौविध्यानां सूची, स्थापनायाः वर्षञ्च। (दत्तांशप्रारूपम्)) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103 |
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103 |
| Paste link of videos and geotagged photographs (भूचित्रसंवलितानां दृश्यसामग्रीचित्राणां सन्धानम्।) | View Document (https://ssvv.ac.in/download/c3-new/3.1.5%20pl |

***3.1.5 Percentage of departments with UGC-SAP, CAS, funding from DST/ ICSSR/ ICPR, Shastra-chudamani Scheme, Ashtadashi Scheme and other similar recognitions by government agency***

***विश्वविद्यालयानुदानायोगस्य विशिष्टसहायताकार्यक्रमस्य (SAP) प्रगताध्ययनकेन्द्रत्वेन डी.एस्.टी., आय.सी.एस्.एस्.आर्., आय्.सी.पी.आर्. संस्थाभ्यः शोधनिमित्तं धनप्राप्तिः, शास्त्रचूडामणियोजनायां प्रकर्षकेन्द्रत्वेन नवाचारकेन्द्रत्वेन अष्टादशीयोजनायाम् अन्यस्यां वा सदृशयोजनायाम् अभिज्ञातानां विभागानां प्रतिशतता।***

**Answer:** 60

3.1.5.1 Number of departments with UGC-SAP, CAS, funding from DST/ ICSSR/ ICPR, Shastra-chudamani Scheme, Ashtadashi Scheme and other similar recognitions by government agency

विश्वविद्यालयानुदानायोगस्य विशिष्टसहायताकार्यक्रमस्य प्रगताध्ययनकेन्द्रत्वेन डी.एस्.टी., ऐ.सी.एस्.एस्.आर्., ऐ.सी.पी.आर्. संस्थाभ्यः शोधनिमित्तं धनप्राप्तिः शास्त्रचूडामणियोजनायां प्रकर्षकेन्द्रत्वेन नवाचारकेन्द्रत्वेन वा अष्टादशीयोजनायाम् अन्यस्यां वा सदृशयोजनायाम् अभिज्ञातानां विभागानां सङ्ख्या।

Answer: 3

3.1.5.2 Number of departments offering academic programme

शैक्षिकपाठ्यक्रमान् सञ्चाल्यमानानां विभागानां सङ्ख्या

Answer: 5

| File Description | Document |
|---|---|
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSF |
| e-version of departmental recognition letters or other award letters (विभागीय-अनुदान-अनुमतिपत्राणां वैद्युतभागः अथवा अन्यानुमतिपत्राणि) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSF |

***3.1.6 Does the university has the following –***

***1. Scheme for preparation of critical edition of unpublished manuscripts for research projects and research degrees***

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 50 | 50 | 50 | 50 | 50 |

| File Description | Document |
|---|---|

| | |
|---|---|
| Upload any additional information (अतिरिक्ताः सूचनाः।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/1030 |
| Report of the event (for ex. Sanskrit Pratibha Samaroha, Koumudi Mohotsava etc..) (कार्यक्रमस्य प्रतिवेदनम्। (संस्कृतप्रातिभसमारोहः, कौमुदीमहोत्सवः इत्यादयः)) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/1030 |
| Number of sports and cultural activities / competitions organised per year (प्रतिवर्षं संस्थया आयोजितानां क्रीडा-सांस्कृतिकगतिविधीनां/ स्पर्धानां सङ्ख्या) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/1030 |

***5.3.4 The university involves and encourages its students to publish materials like catalogues, wall magazines, university magazine, and other materials. List the major publications/ materials brought out by the students during the last four academic sessions.***

***विश्वविद्यालयेन संग्रहसूचीनां, भित्तिपत्रिकाणां, विश्वविद्यालयपत्रिकाणां तदितरसामग्रीणां च प्रकाशनाय छात्राः समावेश्यन्ते प्रोत्साह्यन्ते च। विगतशैक्षिकवर्षचतुष्टये/अर्धसत्रचतुष्टये छात्रैः प्रकाशितानां प्रमुखप्रकाशनानां/ सामग्रीणां च सूची दीयताम्।***

**Answer:**

**उपुर्यक्ताः सर्वे अंशाः सन्ति।**

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन ये ग्रन्थाः छात्राणां कृते प्रकाशिताः तावत्संख्याकाः ग्रन्थाः अन्येन केनापि संस्कृत विश्वविद्यालयन नैव प्रकाशिताः इत्युक्ते नैव अतिशयोक्तिः भवति।

1. अत्र **सरस्वती सुषमा** इति नाम्ना एकः वार्षिकः ग्रन्थः प्रचुरितो भवति, एवं **विश्वविद्यालय वार्ता** इति अपरो ग्रन्थः मुद्रितो भवति ।
2. छात्राणां पक्षतः अपि **'प्राची'** इति नाम्ना एका वार्षिक पत्रिका मुद्राप्यते । तत्र सर्वेषां छात्राणां लेखाः भवति।
3. **सारस्वती सुषमायां** अनेकेषां विदुषां अपूर्वलेखाः दरीदृश्यन्ते । अस्याः वार्षिक पत्रिकायाः प्रसिद्धिः आभारतं राराजते. यतः सर्वेऽपि संस्कृतज्ञाः तत्र च शोधार्थिनः अवश्यं इमां पत्रिकां पठन्त्येव ।

**छात्राणां ग्रन्थलेखनकौशम्.**

1. **आशुतोष** पाण्डे नामक छात्रः शुक्लयजुर्वेद आचार्यकक्षायाः शोधपत्रादिकं लिखति।
2. व्याकरणविभागीय छात्रः **महेश झा,** नामक छात्रः शास्त्रीस्तरे एव **'लघु व्याकरण कौमुदी'** नामकग्रन्थं रचयामास। सः ग्रन्थः **भारतीयविद्यासंस्थाना त्** संस्थया प्रकाशितः ।
3. **अनुराग त्रिपाठी, दिवाकर अधिकारी** इति नामकौ विश्वविद्यालयस्य छात्रौ, शास्त्रीस्तरे पठनकाले एव **तेनालि (आ.प्र.) स्थित अत्यन्तप्रौढ सांप्रदायिक परीक्षासु भागं गृहीत्वा विश्वविद्यालयस्य शोभां वर्धयतः।**
4. सम्पूर्ण परिसरे **'विधिका'** इति नाम्ना सुभाषितानि वाक्यानि फलके मुद्राप्य छात्राणां सुभाषित वाक्यस्फोरणाय प्रर्यमाणाः वर्तन्ते।

5. एवं 'सारस्वती सुषमा' पत्रिकायां अपि अध्यापकानां खैः सह छात्राणां लेखाः भवन्ति। इयं च पत्रिका 1942 प्रभृति निरन्तरं प्रकाशिता अस्ति।
6. एवं प्रत्येक तत्तत् विभागपक्षतः अपि अनेके ग्रन्थाः पत्राणि च छात्राणां व्युत्पत्तये प्रकाश्य न्ते।
7. एव मनके छात्राः स्वकीयशोधकार्य कुर्वन्तः नूतनतया आगतान् छात्रान् अध्यापयन्ति।
8. **चक्रपाणि मुद्गल** इत्यादि साहित्यविभागीयाः छात्राः इतर संस्थासु अपि छात्रावस्थायामेव स्वकीय पत्राणि प्रकाशयन्ति। यथा शोधग्रन्थाः**, रिसर्च टुडे,** इत्यादि प्रसिद्ध ग्रन्थेषु प्रकाशितं वर्तते।

विश्वविद्यालयः **'संस्कृतसप्ताहः'** इति नाम्ना विशिष्टं कार्यक्रमं प्रतिहायनं आयोजयति। तस्मिन् कार्यक्रम अनेकछात्राः, विभिन्नेषु सांस्कृतिक साहित्यिक गतिविधिषु भागभाजः भवन्ति। अस्मिन् सन्दर्भ सर्वे विभागाः पारम्परिक हस्तलिखित प्रकाशने रताः भवन्ति । **अनुराग त्रिपाठी** इति नामकश्छात्राव्याकरणविभागे शास्त्रिस्तरे स्थितः सन् बहुषु पुस्तकेषु साहाय्यं सम्पाद्यमानो वर्तते। यथा **वैयाकरणसिद्धान्तकौमुदी** इत्यस्य **श्रीधरमुखाल्लासिनी** व्याख्या भाग-7।

व्याकरणविभाग सहायकाचार्याः डॉ. कुप्पा बिल्वेश शर्मा महोदयाः प्रौढमनोरमायाः चित्रप्रभायाः सम्पादनं कुर्वन्ति । तेषु व्याकरणछात्राः अनुराग त्रिपाठी, दिवाकर अधिकारी, इत्येते साहाय्यं कुर्वाणाः सन्ति।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य एका महती प्रतिष्ठिता त्रैमासिकी सारस्वती-सुषमा पत्रिका प्रतिवर्षं निगता भवति, यत्र विद्वद्धरण्यानां महता श्रमेण लिखिता लेखाः प्रकाशयन्ते। अस्या पत्रिकायाः एतादृशं महत्त्वं वर्तते यत् प्रतयः यदि समाप्ताः भवन्ति पुनः प्रकाशनार्थं जनाः प्रार्थयन्ति ।

अर्वाचीन् संस्कृतम्/संस्कृतमञ्जरी/वेदविद्या/राष्ट्रधर्म एवं अन्य संस्कृतपत्रिका/प्राची/सांध्य सुषमा/ गाण्डीवम्/शोधप्रभा/श्रमण सङ्गाय पत्रिका इत्यादि।

1. **सरस्वती भवन म् अध्ययनमाला**

सरस्वती भवन पुस्तकालय सर्वेषां शोधछात्राणां कृते हस्तलिखितग्रन्थानां आवश्यकतानुसारं छायाप्रति दीयते।

| File Description | Document |
|---|---|
| Data Provide the list of Published Materials (प्रमुखप्रकाशनानां/ सामग्रीणां च सूची प्रददत।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/5 |

**5.4 Alumni Engagement**

***5.4.1 The Alumni Association/Chapters (registered and functional) contributes significantly to the development of the institution through financial and non financial means during the last five years***

***पूर्वच्छात्रसङ्घः (पञ्जीकृतः कार्यं कुर्वन् च) विगतपञ्चवर्षेषु आर्थिकयोगदानेन अन्यैः उपायैश्च संस्थायाः उन्नत्यर्थं सार्थकतया प्रयतमानः विद्यते।***

**Answer:**

**उपर्युक्ताः सर्वे अंशाः सन्ति।**

सर्वमस्ति

1. **पूर्वतन छात्रैः सह सम्पर्कः**

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य छात्रसंघः अत्यन्त सक्रियः अस्ति। छात्रसंघः नाम प्राचीन छात्राणां, वर्तमानछात्राणां समूहः । प्राचीनछात्रेभ्यः सर्वदा सम्पर्क सम्पायितुं Online Platform इत्यस्य विनियोगः क्रियते। तदर्थं विश्वविद्यालयेन facebook एवं You Tube Accounts निष्कास्य, तद्वारा असम्बद्धनां अत्यन्तं पुरातन छात्राणां (येषां contact number न लब्धं) तैस्सह सम्बन्धं कल्पयितुं अयं सुगमावकाशः ।

1. **पूर्वतन छात्राणां प्रभावः**

हि अस्य विश्वविद्यालयस्य अनेक पुरातानाः छात्राः देशस्य विभिन्न विद्यासंस्थासु कुलपतित्वेन, निदेशकत्वेन, स्वकीयां सेवां समर्पयन्तः सन्ति। केचन पूर्वतनछात्रसङ्घस्य नायकाः मठाधिपतयो भूत्वा, भारतीयधर्मवैभवं आप्रपञ्चं विस्तारयन्तः सन्ति। केचन राज्यशासन, केन्द्रीयशासने च मन्त्रिणः भूत्वा स्वकीयां प्रजासेवां विदधति । केचन अनेक विश्वविद्यालयेषु आचार्यपदवीं च अलंकुर्वन्ति।

एते सर्वे विश्वविद्यालयस्य प्रगतिं यथा विज्ञातुं प्रभवन्ति, तथा Platform निर्मातुं प्रयत्नशील अस्ति विश्वविद्यालयः। ते पूर्वतनाः छात्राः स्वकीय योगदानं व्यक्तिशः अपि दातुं प्रभवन्ति ।

1. **छात्राणां भूमिका**

विश्वविद्यालयपरिसर यदा यदा विशिष्टाः कायक्रमाः सञ्चाल्यन्ते, तदातदा स्थनीयाः पूर्वतनछात्राः, एवं समीपस्थाः पूर्वतनछात्राश्च स्वकीया प्रेरणया आगत्य स्वकीया योगदानं यच्छान्ति ।

अस्माकं विश्वविद्यालयस्य दीक्षान्तसमारोहे, शिष्टमण्डले छात्राणां तेषामेव प्रतिनिधित्वं वर्तते। ते एव अग्रेसराः भूत्वा स्वागत प्रभृति धन्यवाद पर्यन्तं सर्वमपि कार्यक्रमं निर्वहन्ति। केवलं दीक्षान्त समारोह एव न, विश्वविद्यालयस्य स्थापन दिनोत्सव, एवमितरेषु च तेषामेव मुख्यभूमिका भवति।

1. **छात्रसंघस्य निर्वाचनम्**

एवं छात्रसङ्घस्य सङ्घटनावसरे सर्वथा विश्वविद्यालयः पारदर्शिता मेव दर्शयति। तत्रैको निर्वाचनाधिकारी सर्वां प्रक्रिया निर्वहति। तत्र छात्रपरिषदः कार्यदर्शपदवी, महामन्त्रिपदवी, कोषाध्यक्षपदवी इत्यादिषु निर्वाचनं निर्वाचनाधिकारी महोदयानां आध्यक्ष्ये यथानियमं प्रतिवत्सरं भवति।

**5. छात्रसंघस्य अभियानानि**

अयञ्च वर्तमानः छात्रसङ्घः स्वकीय विद्याभ्यासेन सह "स्वच्छभारत" इतिप्रकल्पवत् स्वच्छ सम्पूर्णानन्द संस्कृत विश्वविद्यालयस्य परिसरः इत्यभियानस्य अन्तर्गतरूपेण परिसरेषु स्वच्छता कार्यक्रमाणां आयोजनमपि करोति।

**6. शिकायत निवारणम्**

अयं यः सङ्घः, पूर्वतनछात्राणां नवीनछात्राणां सेतुरिव कार्यं करोति। अल्पाः अल्पाः समस्याः प्राचीनछात्रा एव निवारयन्ति। समस्यायां बृहत्भूतायां तु **प्राक्टोरियल बोर्ड,** एवं **प्रतिपादकमण्डलिः, शिकायतनिवारण प्रकोष्ठादि** सुव्यवस्था विश्वविद्यालये कल्पिता वर्तते। तत्र सर्वत्रापि छात्रसंघस्य महती भूमिका वर्तते।

यतोहि पूर्वतनछात्रसंघ एव विश्वविद्यालयस्य मुख्या सम्पद्। विश्वद्यालयीय गौरवं स्वभुजेषु संस्कृतसवां करोतीति मोदावहो विषयः ।

विश्वविद्यालयस्य शिकायत निवारण प्रकोष्ठे छात्राणां भूमिका महती वर्तते। 2019 वत्सरे सुश्री अन्नपूर्णा कुमारी (आचार्य द्वितीय समस्टर-साहित्यविभाग) सदस्यत्वेन, 2020 वत्सरे अमित तिवारी (आचार्य तृतीय समस्टर व्याकरण विभाग) सदस्यत्वन शुश्री विभा यादव (आचार्य तृतीय सेमेस्टर साहित्य विभाग) सदस्यत्वेन 2018 वत्सरे शशिकला पटेल (आचार्य द्वितीय साहित्यविभाग) सदस्यत्वेन समितिषु नियोजिताः ।

7. एवं रीत्या प्रतिवत्सरं नूतनाः नूतनाः छात्राः सदस्याः भवन्ति जे इतरेषां छात्राणां समस्यादिकं वारयितुं स्वकीय समपर्णभावं प्रकटयन्ति।

| File Description | Document |
|---|---|
| Upload any additional information (अतिरिक्ताः सूचनाः।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/5 |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://ssvv.ac.in/download//c5-new/5.4.1_17211294 |

***5.4.2 Alumni contribution during the last five years (Amount in Rupees)***

***विगतपञ्चवर्षेषु पूर्वच्छात्रसङ्घेन प्रदत्तम् वित्तीयं योगदानम्- (रूप्यकेषु)***

**Answer:** B. Rs. 75,000/- to 1.00 Lakhs (आ. रू. 75,000/- तः 1.00 लक्षाः पर्यन्तम्)

| File Description | Document |
|---|---|
| Upload any additional information (अतिरिक्ताः सूचनाः।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/ |
| Alumni association audited statements (पूर्वछात्रसंङ्घस्य अंङ्केक्षितलेखापत्रम्।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/ |

***5.4.3 Number of Alumni Association/ Chapters meetings held during the last five years.***

***विगतपञ्चवर्षेषु पूर्वच्छात्रसङ्घस्य उपवेशनानां सङ्ख्या-***

**Answer:** 13

5.4.3.1 Number of Alumni Association/ Chapters meetings held year-wise during the last five years

विगतपञ्चवर्षेषु पूर्वच्छात्रसङ्घस्य समावेशानां वार्षिकसङ्ख्या।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 2 | 4 | 5 | 0 | 2 |

| File Description | Document |
|---|---|
| Upload any additional information (अतिरिक्ताः सूचनाः।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/5.4.: |
| Report of the event (कार्यक्रमस्य प्रतिवेदनम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/5.4.: |
| Number of Alumni Association / Chapters meetings conducted during the last five years (विगतपञ्चवर्षेषु पूर्वच्छात्रसङ्घस्य समावेशानां सङ्ख्या) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/5.4.: |

## 6.Governance, Leadership and Management

### 6.1 Institutional Vision and Leadership

***6.1.1 The governance of the institution is reflective of an effective leadership in tune with the vision and mission of the University***

***विश्वविद्यालयस्य दूरदृष्टिध्येयानुसारेण प्रवर्तमानस्य कार्यदक्षस्य नेतृत्वस्य प्रतिफलनं संस्थायाः प्रशासने भवति।***

**Answer:**

संस्थायाः दूरदृष्टिध्येयानुसारेण प्रवर्तमानस्य कार्यदक्षस्य नेतृत्वस्य प्रतिफलनं संस्थायाः प्रशासने भवति।

अथ शास्त्राध्ययनपरम्परायाः परिरक्षणाय प्रतिष्ठापितस्य सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य 'श्रुतं मे गोपाय' इतीदं ध्येयवाक्यमस्य ध्येयं दूरदृष्टिं च साङ्केतिकरूपेण अभिव्यनक्ति। अयं विश्वविद्यालयः पारदर्शकप्रशासनप्रणाल्याः क्रियान्वयनस्य फलस्वरूपेण केन्द्रीयकार्यालयेन सह संकाय संयुक्तः व्याप्तश्च वर्तते। व्यापकस्यास्य विश्वविद्यालयस्य दृष्टिरपि व्यापिका एव अस्ति। दृष्टिपूतं न्यसेत् पादम् इति वचनमभ्युपगम्य विश्वविद्यालयः समेधमानः वर्तते।

**दूरदृष्टिः प्रशासनञ्च**

1. केन्द्रीयकार्यालयस्य विविधसंकायानां च भवनप्रकोष्ठप्रयोगशाला-क्रीडाङ्गणावासस्थानानां ग्रन्थालयवाचनालयकार्यालयादीनां आसन्दपीठोपकरणदृश्य-श्रव्यसंसाधनानां च अभिवृद्धिसम्पादनं स्तरोन्नयनञ्च।

2. विविधशैक्षिकप्राशासनिकसौकर्याणां प्रकल्पनपुरस्सरं संस्थायाः पुनारचना।

3. राष्ट्रियशिक्षानीतेः (NEP-2020) क्रियान्वयनपुरस्सरं भारतीयज्ञानप्रणाल्याः तदन्तर्गतभाषाकलासंस्कृतेश्च प्रचाराय विकासाय च अपेक्षितानां सार्थकमार्गोपायानम् अन्ववेषणम्।

4. विश्वविद्यालये संस्कृतविभागानां संकायानां च अध्ययनानुसन्धानार्थम् अपेक्षितानाम् अन्ताराष्ट्रियस्तरीयसौकर्याणां प्रकल्पनम् अन्ताराष्ट्रियाध्ययनकेन्द्राणां प्रतिष्ठापनं च ।

5. विश्वविद्यालयस्य संकायानां विभागानां च पुनः सङ्घटनपुरस्सरं नवाचारस्य प्रौद्योगिक्याश्च अनुप्रयोगपुरस्सरं छात्रेभ्यः अध्ययनाय स्वतन्त्रावसरप्रकल्पनम् ।

6. वैश्विकस्तरे संस्कृतभाषायाः शास्त्राणाञ्च प्रचाराय प्रसाराय च अपेक्षितस्य उत्कृष्टोपक्रमस्य उद्विकासः ।

7. संस्कृत-पालि-प्राकृताद्यानां प्राचीनभारतीयभाषाणां संरक्षणप्रसारविकासैः सह नवसन्ततेः अपेक्ष्यानुरूपायाः भाषाध्ययनाध्यापनपरम्परायाः सर्जनम्। सरलमानकसंस्कृतस्य समाश्रयणं च।

8. संस्कृतवाङ्मये निबद्धानां तत्त्वानां गवेषणपुरस्सरम् अस्य वाङ्मयस्य सर्वसाधारणीकरणम्।

9. धनस्य समयस्य शक्तेश्च अल्पमात्रेण अनुप्रयोगपुरस्सरं सरलसंस्कृतेन प्राविधिकोपकरणानां साहाय्येन च गभीरशास्त्रीयविचाराणां सरलशैल्या प्रस्तुतीकरणम् ।

10. संस्कृतवाङ्मये सन्निहितानां तत्त्वानाम् अध्ययनाय अनुसन्धानाय शिक्षणाय च उत्सुकेभ्यः जनेभ्यः देश-काल-जाति- लिङ्ग-स्तरादीनां बाधकानां वारणपूर्वकम् अवसरकल्पनम् इत्यादीनि विश्वविद्यालयस्य अग्रदृष्टौ सन्ति।

**ध्येयं प्रशासनञ्च -**

अनुदिनं लोकसम्मतानि ध्येयानि ध्यायतः जनस्यध्सङ्घटनस्य ध्येयपदार्थविशेषेषु सङ्गः सहजतया सङ्गाय सञ्जायते। एतदनु ध्येयेषु पारम्परिकशास्त्रीयविषयविशेषेषु विश्वविद्यालयस्य सङ्गः सञ्जातोऽस्ति। विश्वविद्यालयस्य विभिन्नेषु सङ्काय परिसरेषु विभिन्नानां शास्त्राणाम् अध्ययनाध्यापनपरम्परा अवच्छिन्नरूपेण प्रचलति। देशस्य विदेशस्य च छात्रेभ्यः स्वाभीष्टं शास्त्रीयं विषयं स्वाभीष्टविभागे पठितुमत्र अवसरः प्रकल्पितोऽस्ति। यत्र विश्वं भवत्येकनीडम् इतीमां वैदिकसूक्तिं ध्यायतः विश्वविद्यालयस्य प्रशासनेन भवनेषु एतदर्थं सुव्यवस्था परिकल्पिता अस्ति । पुनः भारतीयज्ञानप्रणाल्याः संरक्षणोपायम् अनुक्षणं ध्यायन् सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः प्राचीनज्ञानविज्ञानयोः प्रचारकान् संरक्षकान् च विना भेदभावं प्रोत्साहयति। विश्वविद्यालयस्य विशिष्टाः योजनाः एतदर्थमेव सक्रियाः सन्ति। तासु प्रमुखाः यथा - आदर्शसंस्कृतमहाविद्यालयाःध्शोधसंस्थानानि

* **स्नातकस्तरे शिक्षाशास्त्रिस्तरे च अध्यापकप्रशिक्षणम्**

विश्वविद्यालयः प्रतिवर्षं शिक्षाशास्त्रिकक्ष्यायां प्रवेशाय अखिलभारतस्तरे लालभवने प्रवेशपरीक्षां निर्वर्तयति, तत्रापि वरीयताक्रमेण छात्राणां चयनं भवति। अध्यापकप्रशिक्षणम् आधुनिकतन्त्राणि आश्रित्य प्रवर्त्यते। प्रत्येकस्मिन् वर्षे बहवः योग्याश्च संस्कृताध्यापकाः विश्वविद्यालयेन निर्मीयन्ते, ते च अध्यापकाः सम्पूर्णभारते माध्यमिकस्तरे प्रभावपूर्णया शैल्या पाठयन्ति ।

* **विभिन्नस्तरेषु संस्कृताध्ययनविषयकसंशोधनकार्याणां व्यवस्थापनम्**

संस्थानस्य सर्वेष्वपि विभागेषु बहवः छात्राः शोधकार्यं कुर्वन्ति, तत्प्रोत्साहनाय संस्थानेन शोधच्छात्रेभ्यः उत्तमशोधवृत्तिः दापत्ये तथा विद्यावारिधिः इति उपाधिना च योग्याः सम्मान्यन्ते । शोधच्छात्राणां रुचेः वर्धनाय समये समये सुप्रसिद्धानां विदुषां व्याख्यानानि च समायोज्यन्ते ।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103 |

| | |
|---|---|
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://ssvv.ac.in/CSIX) |

***6.1.2 The institution practices decentralization and participative management***

***संस्था सहभागिप्रबन्धनव्यवस्थां विकेन्द्रीकरणप्रक्रियां च अनुसरति।***

**Answer:**

सम्पूर्णानन्दकेन्द्रीयसंस्कृतविश्वविद्यालयस्य प्रबन्धनव्यवस्था पूर्णशः सहभागिनी विकेन्द्रीकरणप्रक्रियाश्रिता चास्ति। सङ्घे शक्तिः कलौ युगे इति वचनमनुसृत्य प्रशासनव्यवस्था स्वीयानां मानवीयतत्त्वानां सहयोगं स्वीकृत्य एव कार्यं करोति। प्रबन्धनपरिश्रमयोः सुचारुरूपेण सङ्घटनाभावे प्रशासनकार्याणि निर्विघ्नं न सम्भवन्ति। अतः सहभागिप्रबन्धनव्यवस्थां विकेन्द्रीकरणप्रक्रियां च सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः अनुसरति । सहभागिप्रबन्धनव्यवस्थायाः अनुसरणेन विकेन्द्रीकरणप्रक्रियायाः क्रियान्वयनेन च सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कृते जायमानाः लाभाः यथा -

1. संस्कृतेन सम्बद्धानां नूतनविचाराणां योजनानां च क्रियान्वयनावसरे विश्वविद्यालयस्य प्रबन्धनव्यवस्था आत्मानं सबलम् इति भावयति। यतोऽहि समेषां सङ्कायानां परिपूर्णः सहयोगः एव प्रबन्धनव्यवस्थायाः बलमस्ति।

2. लक्ष्यप्राप्तिप्रसङ्गे समयसीम्नि कार्यकारणावसरे समस्यायाः समाधानान्वेषणावसरे च प्रत्येकमपि सङ्कायः व्यक्तिगतभूमिकां दायित्वं च अवगम्य प्रतिपदं व्यक्तिगतं योगदानं प्रयच्छति। अनेन विश्वविद्यालयस्य धनसमयशक्तीनां सदुपयोगः जायते।

3. सहभागिप्रबन्धनव्यवस्थायाः अनुसरणेन सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य समेषां कर्मचारिणां मनोबलं प्रतिपदं समभिवर्धतेतमाम् ।

4. सहभागिप्रबन्धनव्यवस्थायाः अनुसरणेन विकेन्द्रीकरणप्रक्रियायाः क्रियान्वयनेन च विश्वविद्यालयः विख्यातः व्याप्तः एकमेवाद्वितीयः संस्कृतविश्वविद्यालयः इति प्रकीर्त्यते।

5. विश्वविद्यालयः नूतनयोजनानां क्रियाकलापानां च अनुप्रयोगात् पूर्वं परामर्शशैलीम् आश्रित्य समेषां परामर्शान् स्वीकृत्य अन्तिमनिर्णयं स्वीकरोति । एवमेव अन्तिमनिर्णयप्रसङ्गेऽपि संयुक्तनिर्णयशैलीं समाश्रित्य प्रशास्ति। विभिन्नाः परिषदः , समितयः , प्रकोष्ठाः , मण्डलानि , सङ्काया विभागाश्च प्रशासनव्यस्थां सबलीकर्तुमेव संरचिताः सन्ति।

विश्वविद्यालयस्य विभिन्नाः समितयः संस्थायाः हितं विकासं च मनसि निधाय कार्यं कुर्वन्ति। तासु प्रमुखाः समितयः यथा -

**1. परीक्षासमितिः**

परीक्षायाःतिथ्यादिनिर्धारणं, परीक्षायाः व्यवस्थापनम्, केन्द्रस्थानस्य निर्धारणम्, प्रवेशपत्रप्रश्नपत्रादीनां वितरणम्, उत्तरपत्रिकाणां स्वीकरणम्, मूल्याङ्कनार्थं केन्द्रीयकार्यालयं प्रति प्रेषणम् इत्यादीनां निर्णयः अस्यां समितौ भवति।

**2. शोधसमितिः**

शोधसमितिः चितानां शोधार्थिनां शोधप्रस्तावं परिशीलयति । समीक्ष्य च मुख्यालयं प्रेषयति । छात्रवृत्तिप्रदाने संस्तौति । कार्यप्रगतेः निरीक्षणं करोति। शोधस्तरपरिरक्षणाय अपेक्षितव्यवस्थादिकं विधाय केन्द्रीयशोधसमितेः संसूचनानां अनुपालनं करोति।

**3. ग्रन्थालयसमितिः**

ग्रन्थालयसमितिः पुस्तकानां क्रयणसंरक्षणसंस्थापनवितरणादिषु कार्येषु प्रतिपदं मार्गदर्शनं करोति।

**4. वित्तसमितिः**

वित्तसमितिः वेतननित्यनैमित्तिकव्ययादीनां प्रबन्धनाय कार्यं करोति। वित्तीयसमितेः अनुमोदनेन सहयोगेन च क्रियाकलापान् विभागः संयोजयति।

**5. प्रवेशसमितिः**

प्रवेशसमितिः छात्राणां प्रवेशप्रक्रियायाः नामाङ्कनस्य परिचयपत्रप्रवेशिकादीनां च वितरणकार्यं निर्वहति। प्रवेशसमितेः अनुशासनेन विद्यार्थिनां प्रवेशः नियमानुसरं क्रियते ।

**6. अनुशासनसमितिः**

अनुशासनसमितिः अनुशासनभङ्गकरान् परिवेषान् वारयितुम् अनुशासनव्यवस्थां परिरक्षितुं च साहाय्यं करोति ।

**7. छात्रावाससमितिः**

छात्रावाससमितिः छात्राणां आवासभोजनव्यस्थादीनां व्यवस्थादिकं निर्वहति । छात्रावासे प्रवेशाय अपेक्षितान् नियमान् निर्धारयति ।

**8. शैक्षिकसमितिः**

शैक्षिकसमितिः शैक्षिकक्रियाकलापानां सञ्चालनाय प्रतिपदं शासनस्य साहाय्यम् आचरति।

**9. प्रकाशनसमितिः**

प्रकाशनसमितिः शोधपत्रिकायाः निमन्त्रणपत्रिकादीनां विद्वद्भिः लिखितानां सम्पादितानां वा ग्रन्थानां च प्रकाशनाय उपकरोति ।

**10. उत्पीडनावरोधकसमितिः**

उत्पीडनावरोधकसमितिः विश्वविद्यालये उत्पीडनादीनाम् अनैतिकगतिविधीनां नियन्त्रणाय तत्र संलग्नान् दण्डनाय च संसुतिं प्रयच्छति।

**11. प्रतियोगितासमितिः**

प्रतियोगितासमितिः छात्राणां सर्वाङ्गीणविकासाय अपेक्षिताः विविधप्रतियोगिताः आयोजयति प्रेरयति च।

**12.क्रयणविक्रयणसमितिः**

क्रयणविक्रयणसमितिः विश्वविद्यालयाय अपेक्षितपदार्थानां क्रयणाय नष्टपदार्थानां विक्रयणाय च संस्तौति।

**13. मुद्रणसमितिः**

मुद्रणसमितिः विश्वविद्यालयस्य शैक्षिकशैक्षिकेतरकार्यक्रमैः सम्बद्धानां दत्तांशानां मुद्रणाय कार्यं करोति । प्रश्नपत्राणां, पञ्चाङ्गस्य, वार्षिकावकाशसूचीनां, ग्रन्थानां चान्येषां मुद्रणाय कार्यं करोति। चा एवं विशिष्टासु समितिषु विश्वविद्यालयस्य शिक्षकाः कर्मचारिणश्च शासनाय परिपूर्णं सहयोगं यच्छन्ति। आसां माध्यमेन सर्वेऽपि शैक्षिकप्राशासनिककार्याणि सुचारुरूपेण जायन्ते।

1. संस्थायाः उत्पादकतायां गुणवत्तायां च उत्तरोत्तरोत्तरं वृद्धिसम्पादनाय सहभागिप्रबन्धनव्यवस्था भृशं साहाय्यम् आचरति।

2. प्रजातन्त्रात्मकप्रणाल्याः उद्विकासे सहभागिप्रबन्धनव्यवस्थायाः मुख्यभूमिका अस्ति इत्यत्र विश्वविद्यालयस्य दृढविश्वासः विद्यते।

3. प्रबन्धनकौशलानां विकासे उपार्जने च सहभागितायाः प्रमुखं स्थानम् अस्ति इति विश्वविद्यालयः अभिप्रैति।

एवं विभिन्नस्तरेषु शासनस्य अधिकारस्य शक्तीनां च वितरणं विश्वविद्यालयस्य वर्तते। सूत्रे मणिगणाः इव प्रशासने विकेन्द्रीकरणप्रणाली शोभते।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103 |

| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://ssvv.ac.in/download/NAAC2023/C6/6,1, |
|---|---|

***6.1.3 Sanskrit-Version of vision, mission statement of the university, the Act, Statute, MoA and Rules, Official notification/information, Regulations are available in institutional website.***

***विश्वविद्यालये दूरदृष्टिपत्रस्य, ध्येयपत्रस्य, अधिनियमानाम्, संवैधानिकनिकायानाम्, विश्वविद्यालयस्य लिखितनियमानाम्, औद्योगिकसूचनानां, विनियमानाञ्च संस्कृतरूपान्तरणम् उपलभ्यते।***

**Answer:**

अथ संस्कृतभाषायाः सर्वतोमुखविकासाय आभारतं संस्कृतस्य प्रचाराय प्रसाराय च स्वायत्तसंस्थारूपेण 1791 तमस्य चैत्र मासस्य चैत्रशुक्लप्रतिपदि सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः प्रतिष्ठापितः। अस्मिन् विश्वविद्यालये दूरदृष्टिपत्रस्य, ध्येयपत्रस्य, अधिनियमानाम्, संवैधानिकनिकायानाम्, विश्वविद्यालयस्य लिखितनियमानाम्, औद्योगिकसूचनानां विनियमानाञ्च अधिकाधिकानि संस्कृतरूपान्तराणि सम्पादितानि । तेषु कानिचन जालपुटे आरोपितानि सन्ति। विश्वविद्यालयस्य जालपुटे एतद्विषयकं विवरणमपि अस्ति। एवं प्रशासने, प्रबन्धने, सञ्चिकानामुपरि टिप्पणीलेखने, सूचनाफलकस्योपरि , कार्यालयीयसूचनासु, शिक्षकविषयकसूचनाप्रदाने अन्येषु कार्येषु च मुख्यमाध्यमरूपेण संस्कृतभाषा स्वीकृता विभागेषु वर्तते। सर्वेषु संस्कृतमाध्यमेन अधिकाधिकाः सूचनाः प्रसार्यन्ते। अधिकाधिकाः कार्यालयीयकर्मचारिणश्च संस्कृतेन व्यवहर्तुं लेखितुं च प्रभवन्ति। अतः कार्यालयीयसूचनाः स्थानीयपरिवेषानुगुणं संस्कृतेन प्रादेशिकभाषासु च प्रसार्यन्ते। छात्रसम्बद्धाः शैक्षकक्रियाकलापानां सम्बद्धाः सूचनाः अधिकाधिकाः संस्कृतेन सह हिन्द्याम् , प्रसार्यन्ते। सूचना प्रसाराय शब्दपरिचयाय पञ्चाङ्गपठनाय योग्यानि फलकानि तत्र तत्र सन्ति।

स्वोद्देश्यस्य प्राप्त्यर्थं सर्वकारस्य विभिन्नयोजनानाम्ध्कार्यक्रमाणां निष्पादनाय विश्वविद्यालयः अधोलिखितगतिविधीन् संचालयति।

1. माध्यमिक- पूर्वस्नातक-स्नातक-स्नातकोत्तर-विद्यावारिधिस्तरेषु पारम्परिकपद्धत्या संस्कृतशिक्षणम्।

2. स्नातक-(शिक्षाशास्त्री/बि.एड्.)स्नातकोत्तर-(शिक्षाचार्य/एम.एड्.)स्तरयोः संस्कृतशिक्षणप्रशिक्षणम्।

3. संस्कृतस्य विभिन्नविषयेषु शोधकार्यार्थं प्रोत्साहनम्।

4. संस्कृतस्य प्रचाराय राज्यशासनस्य योजनानां कार्यान्वयम्।

5. संस्कृतपुस्तकालयानां पाण्डुलिपिसंग्रहालयस्य स्थापना तथा दुर्लभपाण्डुलिपीनां महत्त्वपूर्णयोग्यपुस्तकानां प्रकाशनम्

एवमेव दूरदृष्टिपत्रस्य ध्येयपत्रस्य संस्कृतरूपान्तरणम् संस्थायाः जालस्थाने उपलभ्यते। अधिकाधिकानां प्रलेखानां

संस्कृतरूपान्तरणस्य कार्यम् अद्यावधि सम्पादितमस्ति ।

लक्ष्यम् उद्देश्यानि च संस्कृतभाषायाम् अनूद्य जालपुटे स्थापितानि सन्ति । यथा -

1. परम्परागतमाध्यमेन माध्यमिक-स्नातक-स्नातकोत्तर-विद्यावारिधिस्तरेषु अध्यापनम् -

उपषट्शतानि स्वयंसेविसंस्कृतसंस्थाश्च विश्वविद्यालयेन सम्बद्धाः सन्ति।

इत्यादय 36 विषयाः विभागाश्च तत्र इमे विभागाः विलसन्ति यथा द साहित्यविभागः , न्यायविभागः , व्याकरणविभागः , धर्मशास्त्रविभागः , पुराणेतिहासविभागः , अद्वैतवेदान्तविभागः , जैनदर्शनविभागः , नव्यन्यायविभागः , साङ्ख्ययोगविभागः , मीमांसाविभागः वेदविभागः ज्यौतिषविभागश्चेत्यादयः सन्ति । विभागीयसूचनाः अधिकाधिकाः संस्कृतेन निर्गच्छन्ति। सर्वाणि अनुसन्धानकार्याणि संस्कृतमाध्यमेन एव जायन्ते। बृहत्पुस्तकालयोऽपि विश्वविद्यालयीय वर्तते यत्र सर्वशास्त्रसम्बद्धानि पुस्तकानि तथैव पाण्डुलिपयः , ताडपत्राणि,भूर्जपत्राणि च विद्यन्ते।

2. स्नातकस्तरे शिक्षाशास्त्रिस्तरे च अध्यापकप्रशिक्षणम्

प्रतिवर्षं शिक्षाशास्त्रिकक्ष्यायां प्रवेशाय अखिलभारतस्तरे संस्कृतेन प्रवेशपरीक्षां निर्वर्तयति, तत्रापि वरीयताक्रमेण छात्राणां चयनं भवति। प्रत्येकस्मिन् वर्षे बहवः योग्याश्च संस्कृताध्यापकाः संस्थानेन निर्मीयन्ते, ते च अध्यापकाः सम्पूर्णभारते माध्यमिकस्तरे प्रभावपूर्णया शैल्या पाठयन्ति ।

3. विभिन्नस्तरेषु संस्कृताध्ययनविषयकसंशोधनकार्याणां व्यवस्थापनम्

विश्वविद्यालये बहवः छात्राः शोधकार्यं कुर्वन्ति, तत्प्रोत्साहनाय संस्थानेन शोधच्छात्रेभ्यः उत्तमशोधवृत्तिः प्रदीयते तथा विद्यावारिधिः इति उपाधिना च योग्याः सम्मान्यन्ते । शोधच्छात्राणां रुचेः वर्धनाय समये समये सुप्रसिद्धानां विदुषां व्याख्यानानि च समायोज्यन्ते।

4. विशिष्टपाण्डुलिपिग्रन्थानां शोधग्रन्थानाञ्च प्रकाशनम्

विश्वविद्यालयः विभिन्नैः विद्वद्भिः सुष्ठु सम्पादितानां विविधानां पाण्डुलिपिग्रन्थानाम्, शोधग्रन्थानां च प्रकाशनं करोति ।

5.वाक्यार्थसभा/शास्त्रार्थसभा/सरलमानकसंस्कृतभाषणाभ्यासः/युवमहोत्सवः/ प्रत्यक्षानुभवाय पर्टनम्

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य प्रत्येकं विभागेन प्रतिमासं वाक्याथसभा स्वस्वविभागेषु आयोज्यते यथा व्याकरणविभागेन त्रयोदशी सभा इति, ज्योतिषविभागेन वाग्वधिनी सभा इत्यादि रीत्या आयोज्यते।

6.एकमेव च सर्वे विभागाः मिलित्वा मासिकवाक्यार्थ सभां परिसरस्य वाग्देवीमन्दिरे प्रचालयन्ति। तस्मिन् विश्वविद्यालयीयछात्राः सर्वे भागं गृहीत्वा स्वकीय विषयं उपस्यापर्यन्ति।

7.2019, वत्सरे जुलै मासे प्रो0 राजाराम शुक्ल महोदयानां कुलपतिनां निर्वहणे अन्तराष्ट्रियशास्त्रार्थ सभा शताब्दीभवने आयोजीता। अस्मिन् कार्यक्रमे देवविदेशेभ्यः अनेके पण्डिताः (रिसोर्स परसनः) आगत्य छात्रान् उद्बोधितवन्तः।

8.एवमेव विश्वविद्यालयीय शिक्षाशास्त्री विभागेन सरलमानकभाषाभाषणसामर्थ्यस्य अभिवृध्यर्थं संस्कृतसं भाषण स्पधा, संस्कृतसं भाषण शिबिरादि कार्यक्रमा संचाल्यन्ते।

9.भारतीयंज्ञानवैभव समुल्लसः इति शीर्षकोपेतः व्दसपदम कार्यक्रम प्रतिगुरूवासरं 7 वादनप्रभृति 8:30 वादन पर्यन्तं जूमम ा ध्यमेन प्रचलित। अत्र देशस्य विभिन्नविश्वविद्यालयेभ्यः अध्यापकाः आगत्य विभिन्न विषयेषु छात्रान् उद्बोधयन्ति। अत्र औत्सहिनः अनेके छात्राः भागं मृहीत्वा प्रयोजनं लभन्ते।

10.छात्र कल्याणसंकाय द्वारा करोनाकालं मुक्त्वा प्रायः प्रतिवत्सरं युवसमारोहः आयेज्यते। अत्र अन्त्ज्याक्षरादि कलाः, ललितकलाः, काव्यलेखनादि, क्रीडाडि विषनान् स्वीकृत्य स्पर्धाः भवन्ति।

11.प्रो0 हरि प्रसाद अधिकारी महोदयानां (तुलनात्मक धर्मदर्शनसंकाय) द्वारा अेनेके छात्राः काव्यलेखन शिक्षणे शिक्षणं स्वीकृवन्ति।

12.विश्वविद्यालये संगणकस्यत लैब निर्मितमस्ति तत्र संगणक विज्ञानं, पुस्तकाशनाय अपेक्षितविज्ञानं, प्रतिकृति संम्पाडनार्थं (प्रुफ रीडिंग) शिक्षण दीयते।

13.एवमेव विश्वविद्यालस्य अनेके छात्राः इदानीं भागवतादिपुराणवाचकाः भूत्वा स्वकीयं धर्मप्रचारं कुर्वन्ति तदर्थं पुराणेतिहासविभागः विशेषशिक्षां ददाति।

14.विश्वविद्यालस्य छात्रा सं ास्कृतिक पर्यटनाय अनेकान् मन्दिरान् गत्वा तत्रत्य पौरोहित्यकर्मकाण्डयोः अनुशीलनं कुर्वन्ति एवमेव शिक्षाशास्त्रविभागपक्षतः अपि प्रत्याक्षानुभवार्थ छात्राः अनेकपर्यटनस्थलेषु नीयन्ते।

15.अत्र दीक्षान्तसमारोहे माहमहिमराज्यपालनां, एवं कुलपतीनां, सर्वेषां संकायाध्यक्षानां च भाषणं नियतरूपेण सरलामानकसंस्कृतभाषयैव भवति। तानि सर्वाण्यपि भाषणानि प्रकाशनविभागद्वारा प्रकाश्यन्ते च।

16.प्रातः सायं च विश्वविद्यालयस्य परिसरे ऑडियो माध्यमेन सरलसंस्कृतश्लोकाः, सुभाषितश्लोकाः, विष्णुसहस्रनामस्तोत्रंख् ललितसहस्रनामस्तोत्रं, तोटकाष्टकम् , गुरूवन्दनश्लोक, छात्राणां कृते श्राव्यन्ते।

17.विश्वविद्यालस्य गेयगीमपि सरलमानकसंस्कृतभाषायां निर्मितमस्ति। तस्य गेयस्य विनियोगः सर्वविधकार्यक्रमेषु छात्राः गायन्ति- "इहैव स्थिता भावना भारतीया" इति गीतिकायाः शीर्षकं वर्तते।

18.शैक्षणातिरिक्तविभागीयजनाः कर्मचारिणः अपि विश्वविद्यालये क्रमेण संरलमानकसंस्कृतभाषामेव भाषणं कुर्वन्ति इत्यापि महान् संस्कृतलोकस्य मोदावहोविषयः।

19.विश्वविद्यालस्य केचन् विशिष्टाः अध्यापकाः विश्वविद्यालयकक्षानन्तरं स्वगृहेषु संस्कृतभाषा-भाषण-प्रतिशक्षणं ददति। सम्पूर्णानन्दसंस्कृतविश्वविद्यालये बहोःकालात् अयं संप्रदायः अनुवर्तमानो इति।

| File Description | Document |
| --- | --- |
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103 |
| Sanskrit-Version of vision, mission statement documents on the website(दूरदृष्टिपत्रस्य ध्येयपत्रस्य संस्कृतरूपान्तरणम् संस्थायाः जालस्थाने उपलभ्यते) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103 |
| Provide the weblink of the Sanskrit version of all documents(सर्वेषां प्रलेखानां संस्कृतरुपान्तरणस्य जालसन्धानं प्रयच्छतु) | View Document (https://www.ssvv.ac.in/download//2024/researc |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://ssvv.ac.in/CSIX) |

### 6.2 Strategy Development and Deployment

***6.2.1 Perspective/Strategic plan and deployment documents are available in the institution***

***संस्थायां भविष्यद्योजनायाः/व्यूहात्मकयोजनायाः नियोजनप्रलेखा उपलभ्यन्ते क्रियान्वयनसम्बद्धानि प्रमाणानि वा उपलभ्यन्ते।***

**Answer:**

संस्कृतवाङ्मयं विविधशास्त्रभूयिष्ठमस्तीति विदितमेव । न केवलम् आध्यात्मिकशास्त्राणाम् अपि तु लौकिकानां वैज्ञानिकानां च बहूनां शास्त्राणां बहद्धाण्डागारोपमं वर्तते वाङ्मयमिदम् । अतः समग्रः सम्प्रत्ययः विश्वविद्यालयस्य भविष्यद्योजनायां सन्निहितः वर्तते यत्र हि शास्त्रसर्वस्वम् ़ सम्पत्सर्वस्वम् सङ्कलितं सम्मिलितं चास्ति। क्रमशः यथा -

१. शास्त्रोज्जीविका (Mission mode project) हितशासकानि शास्त्राणि । अतः शास्त्राणां पुनरुज्जीवनाय विश्वविद्यालयः क्रियाशीलाः परियोजनाः निर्माति। विविधानां सङ्कानां विभागानां च समुद्घाटनेन प्रचारेण च शास्त्राणि परिरक्षितानि भवन्ति।

२.शास्त्रसेतुः (Shastra bridge program) एकसम्बन्धिज्ञानम् अपरसम्बन्धिस्मारकम् इत्युच्यते। शास्त्राणि यद्यपि विभिन्नानि परं तानि सर्वाणि परस्परं सम्बद्धानि एव सन्ति। साङ्ख्ययोगयोः न्यायवैशेषिकयोः योगायुर्वेदयोः प्राचीनार्वाचीनयोः शास्त्रयोः इत्येवं विभिन्नानां शास्त्राणां सेतुपाठ्यक्रमाणां सम्प्रयोगः औपचारिकरूपेण विधातुम् विश्वविद्यालयः चिन्तयति।

३.शास्त्रबीजरक्षा (Seed saving for the future) शास्त्राणि अनन्तानि। तत्र आद्यं शास्त्रम् इति प्रकीर्तितं साङ्ख्यशास्त्रं सम्प्रति नेपथ्यं गतमस्ति। सहस्रवर्त्मा सामवेदः इति उच्यते। सम्प्रति केवलं शाखात्रयम् उपलभ्यते। अतः वेदशास्त्राणां परिरक्षणाय अग्रिमसन्तत्यै प्रदानाय च शास्त्रबीजरक्षा इति योजना विश्वविद्यालयस्य भविष्यद्योजनायां समाहितम् अस्ति।

४. शास्त्रदृष्टिः (Shastric perception program) दृष्टिपूतं न्यसेत् पादम् इति उच्यते। शास्त्रदृष्टिः लौकिकालौकिकसुखमूला अस्ति इति ख्यापनाय तस्याः प्रत्यक्षीकरणरूपाणां कार्यक्रमाणां सङ्घटनाय विश्वविद्यालयः चिन्तनं करोति।

५.शास्त्रप्रयोगः (Application of Shastric Principles) 'शास्त्राण्यधीत्यापि भवन्ति मूर्खाः यस्तु क्रियावान् पुरुषः स विद्वान् ' इति सुभाषितकारः वदति। शास्त्राणि प्रयोगपथे न सन्ति चेत्तर्हि तानि निष्प्रयोजकानि सम्भवन्ति। न केवलं शिक्षाक्षेत्रे अपि प्रशासने प्रबन्धने च शास्त्रीयसिद्धान्तानाम् अनुप्रयोगाय विश्वविद्यालयः योजनाः विनिर्माति।

६. शास्त्रसमन्वयः (Shastra + Modern social science) सर्वे भवन्तु सुखिनः इति भारतीयानां चिन्तनधारा। एतदनु प्राचीनशास्त्राणाम् आधुनिकसामाजिकविज्ञानानां च मध्ये समन्वयं सम्पाद्य सम्मिश्रितपाठ्यचर्यां निर्माय तदध्ययनाय स्वतन्त्रतावसरकल्पनं विश्वविद्यालयस्य भविष्यद्योजनायाः एकम् अङ्गम् अस्ति। सर्वविधानां छात्राणां सर्वविधापेक्षायाः पूर्तिं कर्तुं समन्वयः अनिवार्यः एव । नवशिक्षानीतिरपि प्राचीन-अर्वाचीनशास्त्राणां समन्वयसम्पदानाय संसूचनाः प्रायच्छत्।

७. शास्त्रजीविका (Employment/Livelihood focus) उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः दैवेन देयमिति कापुरुषा वदन्ति इति सूक्तं सुभाषितकारेण। आजीविकाप्रदानाभावे शास्त्राणाम् अध्ययनाध्यापने समधिकोत्साहं न प्रकटयेयुः । संस्कृतज्ञानां कृते संस्कृतक्षेत्रे संस्कृतेतरेषु इतरेष्वपि क्षेत्रेषु विविधोद्योगावसरप्रकल्पनम् अपि विश्वविद्यालयस्य भविष्यद्योजनायाः एकम् अङ्गं वर्तते।

८.मुक्तशास्त्रशाला (Open, online, short time courses) बृहन्मुक्तान्तर्जालाश्रितपाठ्यक्रमः (MOOCs) इत्येषः अन्तर्जालाश्रितः दूरस्थशिक्षाकार्यक्रमः अद्यत्वे शिक्षणाधिगमक्षेत्रे प्रसिद्धः प्रासङ्गिकः सामयिकश्च वर्तते। भौगोलिकदृष्ट्या दूरस्थाः अपि छात्राः शिक्षकाः च अस्य जालस्य माध्यमेन समीपस्थाः एकत्रिताः वा भवन्ति । जगतीतले यस्मिन् कस्मिन्नपि कोणे वसता शिक्षार्थिना निःशुल्कशिक्षाग्रहणाय परिकल्पितायाम् अस्यां अन्तर्जालाश्रितशैक्षिकव्यवस्थायां प्रत्यक्षरूपेण नियतरूपेण च ज्ञानसम्पादनाय विफलाः छात्राः लाभान्विताः सम्भवन्ति। अतः मुक्तशास्त्रशालानां प्रतिष्ठापनं विश्वविद्यालयस्य भविष्यद्योजनायाम् अन्तर्भवति।

९. शास्त्रान्तरानुसन्धानम् (Multidisciplinary research) बहुविषयकाध्ययनानुसन्धानसौकर्याणि प्रकल्प्य उच्चशिक्षासंस्थानां स्तरोन्नयनाय राष्ट्रियशिक्षानीतौ (NEP - 2020) नैकाः संसूचनाः प्रदत्ताः A Multi & disciplinary Education and Research Universities (MERU) इत्यस्य परिकल्पनानुसारं विश्वविद्यालये शास्त्रान्तरानुसन्धानाय विविधाः सक्रियाः भविष्यद्योजनाः सङ्कल्पिताः सन्ति।

१०. शास्त्रज्योतिः (Establishment of research centres) शास्त्रशस्त्राः आसन् बहवो हि मनीषिणः । आधारभूतम् अथवा विशुद्धम् अनुसन्धानं पूर्ववत् सम्पादयितुम् अनुसन्धानकेन्द्राणि अपेक्ष्यन्ते। सर्वेषु शास्त्रानुसन्धानकेन्द्राणि प्रतिष्ठाप्य नवनवीनतथ्यानां संशोधनाय शिक्षकेभ्यः शोधार्थिभ्यः च अवसरप्रकल्पनम् अपि भविष्यद्योजनासु मुख्या योजना एव वर्तते यथा शास्त्रसर्वस्वं भविष्यद्योजनायां सन्निहितं वर्तते तथैव सम्पत्सर्वस्वम् अपि सन्निहितं वर्तते। तद्यथा-

1.विश्वशान्त्यै धार्मिकसंवादकेन्द्रम्

2.सिन्धीपीठम् , उत्कलपीठम्

3.अन्ताराष्ट्रियं भारताध्ययनकेन्द्रम्

4.अन्ताराष्ट्रियं योगकेन्द्रम्

5.अन्ताराष्ट्रियं कौशलविकासकेन्द्रम्

6.अन्ताराष्ट्रियं पुरातत्त्वसंस्कृतकेन्द्रम्

7.वैदिक अध्ययन केन्द्रम्

ज्ञानं भारः क्रियां विना' इत्युक्तिं स्मारं स्मारं केन्द्रीयसंस्कृतविश्वविद्यालयः संस्कृतक्षेत्रस्य सर्वाङ्गीणविकासाय नैकविधाः भविष्यद्योजनाः निर्माति। विश्वविद्यालयस्य जालस्थाने एताः सर्वविधयोजनाः सविस्तरम् उल्लिखिताः सन्ति। व्यूहात्मकयोजनासु क्रियापराः समयसाध्याश्च याः योजनाः सन्ति तासां निर्वहणाय केन्द्रीयसंस्कृतविश्वविद्यालयस्य योजनाविभागः अनुदिनं कार्यं करोति। प्रतिवर्षं विश्वविद्यालयस्य योजनासम्बद्धानि विविधानि विज्ञापनानि पत्रिकासु सामाजिकमाध्यमेषु च प्रकटीक्रियन्ते। विश्वविद्यालयस्य वार्षिकप्रतिवेदनेऽपि एतद्विषयकं विवरणं सविस्तरम् उपलभ्यते।

| File Description | Document |
| --- | --- |
| Strategic Plan and deployment documents on the website(• व्यूहात्मकयोजनायाः नियोजनप्रलेखाः जालस्थाने उपलभ्यन्ते।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/6 |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://ssvv.ac.in/CSIX) |

***6.2.2 Organizational structure of the University including governing body, administrative setup, and functions of various bodies, service rules, procedures, recruitment, promotional policies as well as grievance redressal mechanism.***

***संस्थायां सर्वविधाः प्रबन्धनव्यवस्थासंरचनाः यथा प्रबन्धनसमितिः, प्रशासनव्यवस्था, विविधनिकायानां कार्याणि, सेवानियमाः, प्रक्रियाः, नियुक्तयः, पदोन्नतिनियमाः, परिदेवनानिवारणकार्यप्रणाल्यश्च उपलभ्यन्ते।***

**Answer:**

संस्थायां सर्वविधाः प्रबन्धनव्यवस्थासंरचनाः यथा प्रबन्धनसमितिः , प्रशासनव्यवस्था, विविधनिकायानां कार्याणि, सेवानियमाः , प्रक्रियाः , नियुक्तयः , पदोन्नतिनियमाः , व्यथानिवारणक्रियाविधयश्च उपलभ्यन्ते।

**Answer:**

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य प्रशासनव्यवस्थायाम् अधोलिखिताः सम्मिलिताः सन्ति।

**1. कुलाधिपतिः**

उत्तरप्रदेशशासनस्य राज्यपालः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलाधिपतिः अस्ति। कुलाधिपतेः चयनं शासनं परिनियमानाम् आधारेण करोति। पदाभिधानदृष्ट्याकुलाधिपतिः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य प्रधानः वर्तते। सः विश्वविद्यालयस्य उपाधिप्रदानप्रसङ्गे दीक्षान्तसमरोहादिषु अध्यक्षपीठम् अलङ्करोति।

**2. कुलपतिः**

कुलपतेः नियुक्त्यर्थं कुलाधिपतिना संरचिता एकाचयनसमितिः तदर्थम् अर्हाणाम् एकां तालिकां निर्माति।तालिकातः कुलाधिपतिः एकं व्यक्तिविशेषं कुलपतित्वेन नियोजयितुम् अनुज्ञां ददाति। परिनियमानुगुणमेव कुलपतेः चयनं जायते। कुलपतेः अधीने कुलसचिवः , परीक्षानियन्त्रकः ,

वित्ताधिकारी, ग्रन्थालयाध्यक्ष, सङ्कायप्रमुखाः , शोधसंस्थान निदेशकादयः कार्यं कुर्वन्ति। विश्वविद्यालयस्य प्राधिकरणं प्रबन्धनव्यवस्थां निर्वहति। सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य प्रबन्धनव्यवस्थायाम् एतानि अन्तर्भवन्ति। यथा -

1. कार्य परिषत्:- विश्वविद्यालयस्य सुचारुरूपेण सञ्चालनाय विद्यमाना मुख्या परिषत् इत्युक्ते कार्य परिषत् एव वर्तते। इयं परिषत् विश्वविद्यालयस्य नीतिनिर्धारणे तेषाम् अनुप्रयोगे च प्रधानं पात्रं वहति।

2. विद्यापरिषत्:- विश्वविद्यालयीयशिक्षायाः , शिक्षणप्रक्रियायाः , प्रशिक्षणस्य, परीक्षायाः , अनुसन्धानकार्यक्रमाणां च स्तरपरिरक्षणकर्मणि विद्यापरिषत् मुख्यं स्थानं भजते।

3.संकायमण्डलम् - अध्ययन मण्डलेन उत्सारितं प्रस्तावं विचार्य विद्यापरिषदं प्रतिसारयति।

4. अध्ययनमण्डलम्:- विश्वविद्यालयस्य विभिन्नपाठ्यक्रमाणां निर्माणं अध्ययनमण्डलं करोति। अध्ययनमण्डलं काले काले च विभिन्नपाठ्यक्रमाणां संशोधनं परिवर्तनादिकं कृत्वा कृतसंशोधनानां परिवर्तनादीनाम् अनुमोदनाय संकायमण्डलं प्रतिसारयति।

**परिदेवनानिवारणकार्यक्रमः**

परिदेवनानिवारणकार्यक्रमाणां सङ्घटनस्य आधारः विश्वविद्यालयानुदानायोगाधिनियमः -2018 इत्येषः वर्तते। प्रवेशप्रक्रियादिषु छात्राणां समस्याः सन्ति चेदपि एषः अधिनियमः क्रियान्वितः भवति। पुनः विश्वविद्यालयस्य परिदेवनानिवारणकार्यक्रमप्रणाल्याः सुचारुरूपेण सञ्चालनाय विविधाः समितयः रचिताः सन्ति। आभिः समितिभिः गोपनीयतापूर्वकं समस्यायाः वस्तुनिष्ठपरिहारोपायाः संसूच्यन्ते। यौनोत्पीडनसम्बद्धसमितिः , छात्रसमस्यानिवारणसमितिः , कर्मचारिणां सन्तापापनोदनसमितिः इत्याद्याः सक्रियाः समितयः विश्वविद्यालये सन्ति।

सेवानियमाः , प्रक्रियाः , नियुक्तयः , पदोन्नतिनियमाः च

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः विश्वविद्यालयानुदानायोगस्य 2018 तमसंवत्सरस्य नियमावलिं समाश्रित्य सेवानियमान् पदोन्नतिनियमान् च निर्धारयति। विश्वविद्यालयस्य अध्यादेशे शिक्षकाणां कार्यालयीयकर्मचारिणां नियुक्तिः सेवानियमाः च सङ्ग्रहेण उल्लिखिताः सन्ति। प्रत्यक्षनियुक्तौ ज्येष्ठतायाः आधारेण नियुक्तौ च विश्वविद्यालयानुदानायोगस्य नियमावलिमेव समाश्रयति विश्वविद्यालयः ।

| File Description | Document |
|---|---|
| Upload the document of functions of the University and policies. (विश्वविद्यालयस्य एवं तन्नियमानां च कार्यप्रणाल्याः प्रलेखाः उपारोपणीयाः।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103 |
| Upload document depicting the organizational structure including, governing body and administrative setup. (सर्वविधानां प्रबन्धनव्यवस्थासंरचनानां विवरणं प्रयच्छतु- यथा प्रबन्धनसमितिः, प्रशासनव्यवस्था च।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103 |

| | |
|---|---|
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://ssvv.ac.in/CSIX) |

***6.2.3 Implementation of e-governance in areas of operation***

***1. Planning and Development***

***2. Administration***

***3. Finance and Accounts***

***4. Student Admission and Support***

***5. Examination***

***क्रियान्वयनक्षेत्रेषु वैद्युतप्रशासनस्य नियोजनम्***

***1. योजना, विकासश्च***

***2. प्रशासनम्***

***3. वित्तं, लेखाश्च***

***4. छात्राणां प्रवेशः, प्रोद्बलनं च***

***5. परीक्षा***

**Answer:** A. All 5 of the above (अ. उपर्युक्ताः सर्वे पञ्च)

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103 |
| Screen shots of user interfaces(प्रयोक्तुः अन्तःपृष्ठानां फलकचित्राणि) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103 |
| Details of implementation of e-governance in areas of operation Planning and Development, Administration etc (Data Template) (उपर्युक्तक्षेत्रेषु वैद्युतप्रशासनस्य क्रियान्वयनस्य विवरणम्। (दत्तांशप्रारूपम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103 |

***6.2.4 Effectiveness of various bodies/ cells/ committees is evident through minutes of meetings and implementation of their resolutions.***

***विविधसमितीनां कार्यविवरणेभ्यः, निर्णयानां क्रियान्वयनात् च ज्ञायते यत् संस्थायाः विविधनिकायाः/ विभागाः/ समितयः प्रभावितया फलोन्मुखतया च कार्यतत्पराः सन्ति इति।***

**Answer:**

यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम् तथा सर्वे निकायाः विभागाः समितयश्च समग्रस्य सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य दूरदृष्टेः अनुरूपं ध्येयानाम् आपूर्तये च संस्थिताः सन्ति। करचरणाद्यङ्गानां शरीरसंरचनायां यादृशी भूमिका वर्तते तादृशी एव भूमिका विविधानां संकायानां विभागानां विभिन्नसमितीनां च वर्तते। अवयववैकल्ये न्यूनतायां वा यथा शरीरं न शोभते तथैव विविधानां निकायानां विभागानां समितीनां सुचारुरूपेण सङ्घटनाभावे विश्वविद्यालयः अपि न शोभते। अतः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः अमीषां सक्रियतायाः विषये विशिष्टं ध्यानं वहति। विशिष्य विकेन्द्रीकरणप्रशासनप्रणाली वर्तते इत्यतः अमीषां मध्ये सामञ्जस्यम् अपि संस्थापयति।

विकेन्द्रीकरणप्रशासनप्रणालीं समाश्रित्य संरचितस्य सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य विविधनिकायाः विभागाः समितयश्च क्रियाशीलाः सन्तः विश्वविद्यालयस्य अभिवृद्धये सन्ततं चेष्टन्ते। विश्वविद्यालयस्य कार्यपरिषदः सभाः नियतरूपेण प्रतिवर्षं जायन्ते यत्र हि विकासपरनीतयः निर्णीयन्ते। निर्धारितनिर्णयानां क्रियान्वयनदृष्ट्या अपि इयं परिषत् प्रधानभूमिकां निर्वहति। विद्यात्परिषत् विश्वविद्यालयीयशिक्षायाः , शिक्षणप्रक्रियायाः , प्रशिक्षणस्य, परीक्षायाः , अनुसन्धानकार्यक्रमाणां च स्तरपरिरक्षणकर्मणि कार्यरता भवति। अस्याः संसूचनाः विभागमुखेन समितिमुखेन च क्रियान्विताः भवन्ति। अध्ययनमण्डलं विश्वविद्यालयस्य विभिन्नपाठ्यक्रमाणां निर्माणं करोति।

विश्वविद्यालयस्य आन्तरिकगुणवत्ताश्वासनप्रकोष्ठः शैक्षिकेषु प्राशासनिकेषु च क्रियाकलापेषु गतिशीलतायाः संवर्धनाय एकस्याः प्रणाल्याः विकासं करोति। आन्तरिकगुणवत्ताश्वासनप्रकोष्ठस्य प्राथमिकोद्देश्येषु संस्थायाः गुणवत्तासंवर्धनाय विश्वविद्यालयेन अनुसर्तव्याः मार्गोपायाः प्रमुखाः सन्ति। काले काले सभासङ्गोष्ठ्यादीनाम् आयोजनेन च विश्वविद्यालयस्य विकासाय प्रयतते । तदीयप्रतिवेदनेषु विश्वविद्यालयस्य गुणवत्तानिर्धारकमानकानां क्रियान्वयनेन प्राप्तस्य फलस्य विवरणम् उल्लिखितं वर्तते। विश्वविद्यालयस्य सर्वेऽपि क्रियाकलापाः छात्राणां विकासाय पूरकाः स्युरिति सङ्कल्पेन आन्तरिकगुणवत्ताश्वासनप्रकोष्ठस्य प्रतिष्ठापनं विहितम् अस्ति। आन्तरिकगुणवत्ताश्वासनप्रकोष्ठस्य संसूचनाः आश्रित्य सक्रियाणां विभागसमित्यादीनां कार्येषु सञ्जाताः प्रगतयः यथा -

1. विश्वविद्यालये च छात्रकेन्द्रितवातावरणं विद्यते येन शिक्षणाधिगमप्रक्रियायां प्रौद्योगिक्याः समावेशः क्रमशः जायमानः वर्तते।

2. गुणवत्तासम्बद्धेषु तत्वेषु छात्राणाम् अभिभावकानां सामाजिकानां च प्रतिक्रियाः स्वीकृत्य शिक्षणाधिगमप्रक्रियायाः संवर्धनदिशि विश्वविद्यालयः सन्ततम् अग्रेसरः वर्तते।

3. उच्चशिक्षायाः विशिष्य शास्त्रशिक्षणस्य परम्परागतपाठ्यक्रमाणां च अभिवर्धने विद्यमानान् मानकान् विनिश्चित्य तेषां पूर्णशः क्रियान्वयनाय यत्नः विधीयते।

4. विश्वविद्यालयस्य गुणवत्तायाः संवर्धनाय महाविद्यालयीयैः विश्वविद्यालयायैः च सह सम्मील्य काले काले कार्यशालानां सङ्गोष्ठीनां सभासमारोहाणाम् आयोजनं क्रियते।

5. विश्वविद्यालयस्य विभागाः फलोन्मुखतया कार्यतत्पराः भवितुम् अपेक्षितानां भौतिकसंसाधनानां व्यवस्थापनं कुर्वन्ति।

6. आन्तरिकगुणवत्ताश्वासनप्रकोष्ठः विकासस्य माध्यमरूपेण कार्यं करोति इत्यतः सर्वे विभागाः समितयः कार्यतत्पराः विद्यन्ते।

7. नियतरूपेण विभागानां पर्यवेक्षणं प्रकोष्ठेन विधीयते इत्यतः विभागानां कार्यतत्परतायाः मूल्याङ्कनं जायमानं वर्तते।

परीक्षासमितिः , शोधसमितिः , ग्रन्थालयसमितिः , वित्तसमितिः , छात्रावाससमितिः , क्रीडासमितिः , कलासंस्कृतिसम्बद्धसमितिः इत्येवं बह्व्यः समितयः सदा सक्रियाः एव सन्तिष्ठन्ते। आसां अन्तिमाः निर्णयाः स्वीक्रियन्ते। छात्रपरिदेवनानिवारणप्रकोष्ठः , महिलाकक्षः इत्यादयः अपि समस्यानां निवारणाय कार्यं कुर्वन्ति। एवं सर्वे विभागसमितिनिकायाः फलदाः क्रियापराश्च सन्ति।

सामान्यतः प्रतिवर्षं शैक्षिकसत्रारम्भात् आसत्रान्तं कार्यक्रमाणां सञ्चालनाय विविधाः समितयः कुलपतीना संरच्यन्ते। वार्षिकोत्सवस्य संस्कृतोत्सवस्य वाग्वर्धिनीमहोत्सवस्य राष्ट्रियसङ्गोष्ठ्याः क्रीडाप्रतियोगितादीनां च आयोजनाय पार्थक्येन समितयः रच्यन्ते। कार्यक्रमसमितिः प्रधानकार्यक्रमाणां निर्वहणाय कार्यं करोति। एषा समितिः कार्यक्रमाणां प्रतिवेदनमपि समर्पयति। वेदिकासमितिः वेदिकानिर्माणादिषु कार्येषु मार्गदर्शनं विदधाति। सभासञ्चालनसमितिः सभाकार्यक्रमाणां सञ्चालनाय व्यवस्थां करोति। पुरस्कारवितरणसमितिः छात्राणां कृते स्पर्धादिषु प्राप्तपुरस्काराणां वितरणाय व्यवस्थां करोति। एवमेव अनुशासनसमितिः

अनुशासनपरिरक्षणकर्मणि साहाय्यं विदधाति। स्वच्छतासमितिः परिसरस्य स्वच्छतापरिरक्षणे प्रतिपदं मार्गदर्शनं करोति। एवं विंशत्यधिकाः समितयः सक्रियाः सन्ति। विश्वविद्यालयस्य सङ्कायप्रमुखाः विभागाध्यक्षाश्च सम्बद्धसङ्कायानां विभागानां कार्यनिर्वहणादिकम् अवलोकयन्ति।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103 |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://ssvv.ac.in/CSIX) |

### 6.3 Faculty Empowerment Strategies

***6.3.1 The institution has effective welfare measures for teaching and non-teaching staff.***

***संस्थया अध्यापकेभ्यः अध्यापकेतरकर्मचारिभ्यश्च प्रभाविसंक्षेमोपायाः अनुस्रियन्ते।***

**Answer:**

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य अध्यापकाः अध्यापकेतरकर्मचारिणश्च तदीयाः मानवीयसम्पदः सन्ति। अतः एतेषां क्षेमाय विश्वविद्यालयः सर्वदा कटिबद्धः वर्तते। न केवलं कार्यरतस्यकर्मचारिणः अपि तु तस्य सम्पूर्णपरिवारस्य अपि क्षेमचिन्तनं विश्वविद्यालयः करोति। शारीरिकरूपेण मानसिकरूपेण पारिवारिकरूपेण आर्थिकरूपेण सामाजिकरूपेण च कर्मचारी सन्तृप्तः चेत्तर्हि सः विगतक्लेशः सन् विश्वविद्यालये स्वीयं कर्तव्योत्तरदायित्वादिकं सम्यक् निर्वोढुं प्रभवति न अन्यथा। अतः एव समेषाम् अध्यापकानाम् अध्यापकेतरकर्मचारिणां क्षेमाय नैके मार्गोपायाः विश्वविद्यालयेन अनुस्रियन्ते । क्रमशः यथा

वैद्यकीयौषधोपचारसौकर्यम्, प्राथमिकोपचारव्यवस्था, वैद्यकीयविरमादयः संक्षेमोपायाः

'शरीरमाद्यं खलु धर्मसाधनम्' इत्युक्तिं मनसि निधाय समेषां कर्मचारिणां स्वास्थ्यपरिरक्षणाय विश्वविद्यालयेन नानाविधानि सौकर्याणि प्रकल्पितानि सन्ति। विश्वविद्यालये प्राथमिकोपचारव्यवस्था सर्वेभ्यः विश्वविद्यालयीयेभ्यः निःशुल्कं परिकल्पिता अस्ति। आकस्मिकरूपेण क्षतिग्रस्तानां तात्कालिकरूपेण उपचाराय प्राथमिकोपचारपेटिकाः सर्वत्र स्वास्थ्यकेन्द्रे संस्थापिताः सन्ति। यदि नियतकर्मचारिणः गभीररूपेण अस्वस्थाः भवन्ति चेत्तर्हि रुग्णालयं गत्वा औषधोपचारं कर्तुं शक्नुवन्ति। वैद्यकीयविरामसौकर्यमपि प्रकल्पितानि सन्ति सर्वेभ्यः नियतकर्मचारिभ्यः । कोरोनाप्रतिरोधकसूचिकाः सर्वादौ निःशुल्कं सर्वेभ्यः कर्मचारिभ्यः प्रदानाय विश्वविद्यालयेन अपेक्षितव्यवस्था कृता।

**शैक्षिकपरिकरसौकर्याणि**

अध्यापकानाम् अध्यापकेतरकर्मचारिणां सन्ततयः सुशिक्षिताः भवेयुः इति कृत्वा ताभ्यः वार्षिकशैक्षिकपरिकराणां व्यवस्थापनाय शैक्षिकसौकर्यवेतनम् अतिरिक्तरूपेण दीयते। कर्मचारिणां सन्ततेः प्रवेशशुल्कम्, समवस्त्रशुल्कम्, वाहनशुल्कम्, पुस्तकशुल्कम् इत्यादीनि शुल्कानि दातुम् अपेक्षितः निर्दिष्टधनराशिः आयशुल्काद् बहिः दियते। अतः कर्मचारिणां परिवारोऽपि लाभान्वितः भवति।

सञ्चारवेतनम्, महार्घतावेतनम्, भाटकगृहवेतनम् इत्यादीनि

अध्यापकानाम् अध्यापकेतरकर्मचारिणां कृते सञ्चारवेतनम्, महार्घतावेतनम्, भाटकगृहवेतनम् इत्यादीनि विशिष्टानि वेतनसौकर्याणि विश्वविद्यालयेन दीयन्ते। मूलवेतनेन सह महार्घतावेतनं देशस्य आर्थिकमहार्घतां संवीक्ष्य सर्वकारेण निर्धार्यते। सर्वकारेण उद्घुष्टानां महार्घतावेतनादीनां प्राप्तिः सकाले जायते इत्यतः विश्वविद्यालयस्य कर्मचारिणः सर्वे ससन्तोषं कार्यं कुर्वन्ति। यात्राप्रसङ्गेषु जायमानस्य अतिरिक्तयात्राव्ययस्य दायित्वं विश्वविद्यालयः एव वहति। भाटकगृहार्थमपि विशिष्टं सौकर्यं कल्पितं भवति। ये परिसरे वसन्ति तेभ्यः वासव्यवस्था, येनवसन्ति तेभ्यः वासधनं दीयते।

कर्तव्यावकाशः , सामान्यावकाशः , प्रसवावकाशः , प्रसविर्त्याः पोषणावकाशः , शैक्षिकावकाशः , अध्ययनावकाशः इत्यादयः ।

विश्वविद्यालयस्य कर्मचारिणः तस्य मूलसम्पदः सन्ति इत्यतः तेभ्यः विविधसन्दर्भेषु अपेक्षितानाम् अवकाशानां प्रदाने विश्वविद्यालयः सर्वदा उत्सुकोऽस्ति। प्रसवावकाशः , प्रसविर्त्याः पोषणावकाशः इत्यादयः अवकाशाः न कदापि निराक्रियन्ते। विषमपरिस्थितौ विश्वविद्यालयः कर्मचारिणा सह सन्तिष्ठते।

### गृहनिर्माणार्थं गणकयन्त्राद्यु पकारणानां क्रयणाय च साहाय्यम्

गणकयन्त्राद्यु पकारणानां अनुप्रयोगेण कर्मचारिणः सर्वे सामयिकाः भवन्ति। अतः ५०, ००० रूप्यकाणि एतदर्थम् अग्रिमधनरूपेण स्वीकर्तुं शक्नुवन्ति। अनन्तरं क्रमशः स्वीकृतधनस्य प्रत्यर्पणं निर्धारितनियमानुगुणं कर्तव्यम्। एवमेव पदयोग्यतानुरूपं गृहनिर्माणाय निर्मितगृहस्वीकरणाय च अधिकाधिकम् एककोटिपर्यन्तमपि अग्रिमधनराशिरूपेण (मूलवेतनस्य १३९ गुणितः धनराशिः अग्रिमधनराशिरूपेण) कर्मचारी स्वीकर्तुं शक्नोति। सप्तमस्य वेतनायोगस्य क्रियान्वयनात् पूर्वं वाहनक्रमणाय द्विचक्रिकाक्रयणाय च अग्रिमधनराशिरूपेण विश्वविद्यालयः बहुभ्यः कर्मचारिभ्यः व्यवस्थाम् अकरोत्।

### यात्रासौकर्याणि

विमानयात्रा, समुद्रमार्गयात्रा, स्थानीययात्रा, भारतदर्शनहेतुकी सविरामयात्रा, गृहगमनार्थकसविरामयात्रा, स्थानान्तरयात्रा, सेवानिवृत्तियात्रा, अग्रिमयात्रा इत्यादिषु यात्राप्रसङ्गेषु कर्मचारिभ्यः विशिष्टानि सौकर्याणि विश्वविद्यालयः प्रकल्पयति। भारतदर्शनादिषु सविरामयात्राप्रसङ्गेषु अर्जितविरामदिवसान् वेतनत्वेन परिवर्त्य सुखेन सपरिवारं यात्रां कर्तुम् अपि अवसरः वर्तते।

स्वैच्छिकनिवृत्तिः , समयपूर्वनिवृत्तिः , चिकित्साधारितनिवृत्तिः , असाधारणनिवृत्तिः इत्यादिषु प्रसङ्गेषु सौकर्याणि।

सेवात्यागप्रसङ्गेषु केन्द्रीयसंस्कृतविश्वविद्यालयस्य अध्यापकाः अध्यापकेतरकर्मचारिणश्च विशिष्टानि सौकर्याणि प्राप्स्यन्ति।

### सेवानिवृत्तेः सौकर्याणि

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य अध्यापकानां अध्यापकेतरकर्मचारिणां स्वाभाविकनिवृत्तिसन्दर्भे विशिष्टानि सौकर्याणि कल्पितानि सन्ति। स्वाभाविकनिवृत्तेः परमपि कार्यं कर्तुं निवृत्तिधनेन सह विशिष्टवेतनं दातुमपि अत्र अवसरः वर्तते। सेवावधौ मृतस्य कर्मचारिणः पाल्याय सेवाया अवसरः नियमानुसारं दीयते। निवृत्तस्य देहावसनात् परमपि विश्वविद्यालयः नियमानुगुणं व्यवस्थां करोति।

एतदतिरिच्य अन्यानि आरक्षितानां कृते नियुक्तौ सौकर्याणि यथा -

1. अनुसूचितजातीयानां जनजातीयानां क्षेमाय आरक्षणसौकर्याणि।

2. सामाजिकरूपेण शैक्षिकरूपेण च पृष्ठगामिनां क्षेमाय आरक्षणसौकर्याणि ।

3. पदाधारितानि आरक्षणसौकर्याणि ।

4. विकलाङ्गानाम् आरक्षणसौकर्याणि।

5. मेधाविनां क्रीडापटूनां कृते आरक्षणसौकर्याणि।

6. दुर्बलानाम् आरक्षणसौकर्याणि इत्यादीनि।

एवं बहुविधानि सौकर्याणि विश्वविद्यालयेन कल्पितानि सन्ति। विश्वविद्यालयः राज्यसर्वकारस्य कर्मचारिणां संक्षेमोपायानां निमित्तं विद्यमानान् सर्वकारीयान् अध्यादेशान् यथावत् परिपालयति। वेतनायोगस्य प्रतिवेदनं प्रतिवर्षं परिशील्य नवीनादेशान् यथावत् परिपालयन् स्वस्य अध्यापकाः अध्यापकेतरकर्मचारिणश्च यथा ससुखं सक्षेमं च जीवनं यापयेयुः तथा व्यवस्थां कल्पयति ।

उत्सवप्रियाः भारतीयाः । अतः स्थानीयोत्सवसन्दर्भेषु (सावन/नवरात्र, दीपावली इत्यादिषु) स्थानीयपरिवेषं मनसि निधाय विशेषावकाशाः कर्मचारिभ्यः दीयन्ते। उत्सवार्थमेव अग्रिमवेतनरूपेणापि शिक्षकेतरकर्मचारिणां कृते निर्दिष्टः धनराशिः प्रदीयते। एतद्विहाय मानवीयदृष्ट्या विश्वविद्यालयीयकर्मचारिणां क्षेमाय सर्वे सदस्याः च साहाय्यं व्यक्तिशः अपि कुर्वन्ति।

शैक्षणिक-शिक्षणेत्तर वर्गाणां कल्याणकारिप्रकल्पेभ्यः सक्रियनिकायाः समितयश्च -

* स्वास्थ्यकेन्द्रम्
* शिकायतनिवारणप्रकोष्ठः
* अध्यापकपरिषद्
* कर्मचारीसंघः
* यौनप्रतिषेधसमितिः
* कर्मचारीकल्याणकोषः

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103 |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://ssvv.ac.in/CSIX) |

***6.3.2 Average percentage of teachers provided with financial support to attend conferences / workshops and towards membership fee of professional bodies during the last five years***

***विगतपञ्चवर्षेषु सङ्गोष्ठीषु/कार्यशालासु भागग्रहणाय, व्यावसायिकनिकायेषु सदस्यताशुल्कनिमित्तञ्च आर्थिकसहायतां प्राप्तवताम् अध्यापकानां सामान्या प्रतिशतता।***

**Answer:** 3.17

6.3.2.1 Number of teachers provided with financial support to attend conferences/ workshops and towards membership fee of professional bodies year-wise during the last five years

विगतपञ्चवर्षेषु सङ्गोष्ठीषु/ कार्यशालासु भागग्रहणाय, व्यावसायिकनिकायेषु सदस्यताशुल्कनिमित्तञ्च आर्थिकसहायतां प्राप्तवताम् अध्यापकानां वार्षिकसङ्ख्या।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 8 | 3 | 3 | 1 | 0 |

| File Description | Document |
|---|---|
| Details of teachers provided with financial support to attend conferences, workshops etc. during the last five years (Data Template) (विगतपञ्चवर्षेषु सङ्गोष्ठीषु/कार्यशालासु भागग्रहणाय, व्यावसायिकनिकायेषु, सदस्यताशुल्कनिमित्तञ्च आर्थिकसहायतां प्राप्तवता) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/1030( |

***6.3.3 Average number of professional development / administrative training Programmes organized by the university for teaching and non teaching staff during the last five years.***

***विगतेषु पञ्चसु वर्षेषु शिक्षकाणां वृत्तिविकासार्थं, शिक्षकेतरकर्मचारिणां प्राशासनिकप्रशिक्षणार्थञ्च संस्थया समायोजितानां कार्यक्रमाणां वार्षिकी सम्पूर्णा सङ्ख्या।***

**Answer:** 1.2

6.3.3.1 Total number of professional development / administrative training Programmes organized by the Institution for teaching and non teaching staff year-wise during the last five years

विगतपञ्चवर्षेषु शिक्षकाणां वृत्तिविकासार्थं, शिक्षकेतरकर्मचारिणां प्राशासनिकप्रशिक्षणार्थञ्च विश्वविद्यालयेन समायोजितानां कार्यक्रमाणां वार्षिकयोगः।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 3 | 0 | 2 | 0 | 1 |

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/ |

| | |
|---|---|
| Reports of the Human Resource Development Centres (UGC ASC or other relevant centres) (मानवसंसाधनविकासकेन्द्रेभ्यः (विश्वविद्यालयानुदानायोगस्य अकादमिकस्टाफ-महाविद्यालयेभ्यः अथवा तदन्यसदृशकेन्द्रेभ्यः) प्राप्तप्रमाणपत्राणि/ प्रतिवेदनानि।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/ |
| Details of professional development / administrative training Programmes organized by the University for teaching and non teaching staff (Data Template)(शैक्षणिक-अशैक्षणिक-कर्मचारिणां व्यावसायिक-विकासार्थं / प्राशासनिक-प्रशिक्षणार्थं विश्वविद्यालयेन समायोजितानां कार्यक्रमाणां विवरणम्। (दत्तांशप्रारूपम्।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/ |

***6.3.4 Average percentage of teachers attending professional development Programmes, viz., Orientation Programme, Refresher Course, Short Term Course, Faculty Development Programmes during the last five years***

***विगतपञ्चवर्षेषु अभिविन्यासपाठ्यक्रम-पुनश्चर्यापाठ्यक्रम-स्वल्पकालिकपाठ्यक्रम-अध्यापकविकासकार्यक्रमादिवृत्तिविकासकार्यक्रमेषु भागग्राहिणाम् अध्यापकानां मध्यमानस्य प्रतिशतता।***

**Answer:** 35.7

6.3.4.1 Total number of teachers attending professional development Programmes, viz., Orientation Programme, Refresher Course, Short Term Course, Faculty Development Programmes year-wise during the last five years

विगतपञ्चवर्षेषु अभिविन्यासपाठ्यक्रम-पुनश्चर्यापाठ्यक्रम-स्वल्पकालिकपाठ्यक्रम-अध्यापकविकासकार्यक्रमादिवृत्तिविकासकार्यक्रमेषु भागग्राहिणाम् अध्यापकानां वार्षिकसङ्ख्या।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 64 | 70 | 35 | 0 | 0 |

| File Description | Document |
|---|---|

| | |
|---|---|
| Reports of the Human Resource Development Centres (UGC ASC or other relevant centers). (मानवसंसाधनविकासकेन्द्रेभ्यः (विश्वविद्यालयानुदानायोगस्य शैक्षिककर्मचारिमहाविद्यालयेभ्यः अथवा तदन्यसदृशकेन्द्रेभ्यः) प्राप्तप्रमाणपत्राणि/ प्रतिवेदनानि।) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSI |
| Details of teachers attending professional development Programmes during the last five years (Data Template) (विगतपञ्चवर्षेषु अभिविन्यासपाठ्यक्रम- पुनश्चर्यापाठ्यक्रम- स्वल्पकालिकपाठ्यक्रम- अध्यापकविकासपाठ्यक्रमादि वृत्तिविकासपाठ्यक्रमेषु भागग्राहिणाम् अथ) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSI |

***6.3.5 Institution has Performance Appraisal System for teaching and non-teaching staff***

***संस्थायां शिक्षकाणां शिक्षकेतरकर्मचारिणां कार्यनिष्पादनज्ञापनप्रणाली वर्तते।***

**Answer:**

सर्वेषां शैक्षिककर्मचारिणां प्रशासनिककर्मचारिणां च कार्यनिष्पादनप्रणाली गोपनीयं विवरणं च संस्कृतविश्वविद्यालयस्य तथा राज्यसर्वकारस्य नियमानुगुणं सम्पाद्यते । सर्वविधप्रक्रियाः विश्वविद्यालय-अनुदान-आयोगस्य मानकमवलम्ब्य आन्तरिकगुणवत्ताप्रकोष्ठेन क्रियते ।
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य परिसरीयाः सर्वे शिक्षकाणांः शिक्षकेतरकर्मचारिणाश्च निर्दिष्टनियमानुगुणं विभागाध्यक्षः कार्यनिष्पादनस्य प्रपत्रं परिपूरयन्ति ।
प्रपत्राणाम् आधारेण योग्याध्यापकेभ्यः कर्मचारिभ्यश्च पदोन्नतिः अन्ये लाभाश्च दीयन्ते । एतत् मूल्याङ्कनं प्रतिवर्षं भवति । एतेषां कर्मचारिणां कार्यनिष्पादनस्य मूल्याङ्कनं च भवति । यथा -
(क) सर्वेषां नियमितशैक्षिककर्मचारिणाम् ।
(ख) सर्वेषां नियमितप्रशासनिककर्मचारिणाम् ।
(ग) सर्वेषाम् अनुबन्धितशैक्षिककर्मचारिणाम् ।
(घ) सर्वेषाम् अनुबन्धितप्रशासनिककर्मचारिणाम् ।
सर्वेषां कर्मचारिणां नाम, अर्हता, परिचायकपत्रम्, विभागः , कार्यस्थानम्, शैक्षिकसत्रम् इत्यादीनाम् उल्लेखः प्रपत्रे क्रियते। सर्वेषां नियमितशैक्षिककर्मचारिणाम् अनुबन्धितशैक्षिककर्मचारिणाम् अतिथिशैक्षिककर्मचारिणाम् तदितराणां च आत्ममूल्याकलनेन सम्बद्धं विवरणं प्रपत्रस्य प्रथमभागे वर्तते। तत्र एते अंशाः पूरणीयाः भवन्ति। यथा -
1. नाम, पदवी, सङ्केतः , स्तरः
2. प्रथमनियुक्तेः विवरणम्, नियुक्तेः निवृत्तेश्च तिथिः
3. शैक्षिकयोग्यताः
4. स्थिरोद्योगीध्संविदाध्आंशकालिकः इत्यस्य पदस्य उल्लेखः ।
ततः स्नातकस्नातकोत्तरस्तरीयाणां शिक्षकाणाम् कक्ष्याकार्यादीनाम् उल्लेखः वर्तते। यथा-
1. सत्रे वितीर्णाः कालांशाः
2. सत्रे स्वीकृताः कालांशाः
3. प्रायोगिककार्यार्थं वितीर्णाः कालांशाः
4. प्रायोगिककार्यार्थं स्वीकृताः कालांशाः
5. कक्ष्यादीनाम् अस्वीकरणे हेतवः
शिक्षकाणां शोधप्रवृत्तेः मूल्याकलनव्यवस्था अपि विश्वविद्यालयेन क्रियते। यथा -
1. वर्षेऽस्मिन् मार्गदर्शकत्वेन स्वीकृतानां शोधच्छात्राणां सङ्ख्या ।

2. उपाधिप्राप्तवतां शोधच्छात्राणां सङ्ख्या ।
3. शोधपरियोजनानां विवरणम् -कृतानां करिष्यमाणानां च सङ्ख्या ।
4. धनदायिनी संस्था ।
5. मुख्यः गवेषकः ।
6. प्राप्यपरिणामाः ।
7. राष्ट्रिये अन्ताराष्ट्रिये च स्तरे शोधपत्राणि प्रस्तुतीकृतं चेत्तर्हि तद्विषये विवरणम् ।
8. शोधकेन्द्रितसङ्गोष्ठ्यादिषु भागग्रहणस्य उल्लेखः ।
9. पुस्तकप्रकाशनादीनि कार्याणि ।
10. रचनात्मकसर्जनात्मकगतिविधीनाम् उल्लेखः ।
11. सभायाः कार्यशालायाः राष्ट्रियसङ्गोष्ठ्याः तदितरेषां कार्यक्रमाणां संयोजकत्वेन कृतकार्यस्य विवरणम् ।
12. शिक्षकैः प्रयुज्यमानानां प्राविधिकोपकरणानां पुनः शिक्षणार्थं गवेषितानां च नूतनोपकरणानाम् उल्लेखः ।

एतत्सम्बद्धानि अधिकविवरणानि कृतकार्याणां प्रमाणैः सह प्रपूर्य कर्मचारिणा दीयते। अधिकारी पृथक्तया प्रमाणीकरणं करोति। प्रतिवेदनाधिकारी अधोलिखितानां विवरणं पूरयति । यथा -

1. विषयज्ञानम्
2. विषयज्ञानवर्धनाय शिक्षकेण कृताः प्रयासाः
3. शिक्षणसामर्थ्यम्
4. नियमितता
5. शिक्षायाः गुणवत्ता
6. छात्रैः सह सम्बन्धः
7. सहोद्योगिभिः सह सम्बन्धः
8. योजनानिर्माणक्षमता
9. साधनसम्पन्नता
10. भागग्राहिता इत्यादीनि।

समीक्षकाधिकारिणा अधोलिखिताः सारांशरूपेण लिख्यन्ते। यथा -

1. शिक्षकाणां शिक्षकेतरकर्मचारिणां च कार्याणि अत्युत्तमानि सन्ति।
2. शिक्षकाणां शिक्षकेतरकर्मचारिणां च कार्याणि उत्तमानि सन्ति।
3. शिक्षकाणां शिक्षकेतरकर्मचारिणां च कार्याणि तृप्तिकराणि सन्ति।
4. शिक्षकाणां शिक्षकेतरकर्मचारिणां च कार्याणि अतृप्तिकराणि सन्ति।

अत्र सर्वत्रापि अधिकारी प्रत्येकमपि शिक्षकस्य कार्यनिष्पादनस्य विवरणं व्यक्तिशः वस्तुनिष्ठरूपेण च पूरयति। तत्प्रतिवेदनम् अतीव महत्त्वपूर्णं भवति।

1. शिक्षकस्य शिक्षकेतरकर्मचारिणः चरित्रम् अत्युत्तमम् अस्ति।
2. शिक्षकस्य शिक्षकेतरकर्मचारिणः समन्वयः अत्युत्तमः अस्ति।
3. शिक्षकस्य शिक्षकेतरकर्मचारिणः प्रतिपुष्टिः अत्युत्तमा अस्ति।
4. शिक्षकस्य शिक्षकेतरकर्मचारिणः अन्यः कोऽपि विशेषांशः अस्ति चेत्तर्हि तस्य उल्लेखः ।

एवं विश्वविद्यालयस्य शिक्षकाणां शिक्षकेतरकर्मचारिणां कार्यनिष्पादनज्ञापनप्रणाली व्यवस्थिता वस्तुनिष्ठा च प्रचलति।

| File Description | Document |
| --- | --- |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://ssvv.ac.in/CSIX) |

### 6.4 Financial Management and Resource Mobilization

***6.4.1 Institution conducts internal and external financial audits regularly***

***संस्था नियमितम् आन्तरं बाह्यं च वित्तलेखाङ्केक्षणं करोति।***

**Answer:**

सर्वस्याः अपि संस्थायाः आर्थिकस्वास्थ्यपरिरक्षणदृष्ट्या आन्तरं बाह्यं च वित्तलेखाङ्केक्षणं प्राथम्यं भजते। एतदनु सम्पूर्णानन्दसंस्कृतविश्वविद्यालयोऽपि नियतरूपेण आन्तरं बाह्यं च वित्तलेखाङ्केक्षणं सम्पादयति। प्रतिवर्षं वित्तलेखाङ्केक्षणेन विश्वविद्यालयस्य वित्तीयव्यहाराणां परिज्ञानं सम्भवति। वित्तीयकोषस्य परीक्षणेन मूल्याङ्कनेन च आयव्ययाभ्यां सह न्यूनतायाः दोषस्य वा ज्ञानं भवति। वित्तीयव्यवहारेषु पारदर्शितायाः परिरक्षणदृष्ट्या वित्तलेखाङ्केक्षणम् अतीव प्रधानं कार्यम् अस्ति। वित्तलेखाङ्केक्षणं तु आन्तरं बाह्यम् इति द्वैविध्यं भजते। क्रमशः यथा -

1. सम्पूर्णानन्दकेन्द्रीयसंस्कृतविश्वविद्यालयस्य आन्तरं वित्तलेखाङ्केक्षणम् -

वित्तसमितिः प्रत्येकम् अपि आन्तरं वित्तलेखाङ्केक्षणं कर्तुम् एकां समितिं विरचय्य प्रति वा प्रेषयति। अनेन सह आन्तरिकाः लेखाधिकारिणः वित्तविभागाधिकारिणश्च सदस्यरूपेण भवन्ति। ते अधिकारिणः समग्रस्य विश्वविद्यालयस्य सङ्कलितं वित्तलेखाङ्केक्षणं व्यवस्थापनवित्तपरिषदोः अनुमोदनेनकुर्वन्ति।

आन्तरं वित्तलेखाङ्केक्षणं कर्तुं या समितिः नियतरूपेण वर्तते तस्याः कार्याणि यथा -

1. विवरणप्राप्तिः ।

2. प्रगतवित्तलेखाङ्केक्षणप्रतिवेदनस्य तथा संसूचनानां च परिशीलनम् ।

3. दूरभाषादीनाम् उपयोगस्य तत्सम्बद्धपञ्जिकायाः च परीक्षणम् ।

4. समेषाम् अभिलेखानां पञ्जिकानां च परीक्षणम् ।

5. भाटकरूपेण स्वीकृतानां भवनानां छात्रावासानाम् आवासस्थानानां च सम्बद्धपञ्जिकानां परीक्षणम् ।

6. मासिककोषस्य शेषांशस्य तत्सम्बद्धपत्राणां च परीक्षणम्।

7. वित्तीयवर्षस्य सर्वासां वित्तीयपत्रिकाणां परीक्षणम् ।

8. अनुबन्धितदेयेन परिवहनदेयेन च सम्बद्धानां पञ्जिकानां परिशीलनम् ।

9. सर्वकारीयवाहनसौकर्यव्यवस्था अस्ति चेत्तर्हि तत्सम्बद्धपञ्जिकायाः निरीक्षणम् ।

10. सर्वकारीयकर्मकराय संस्थायै अन्येभ्यः सौकर्यप्रकल्पकेभ्यः अप्रदत्तधनराशेः विवरणं यदि अस्ति तर्हि तत्पञ्जिकायाः परिशीलनम् ।

11. चरभौतिकपदार्थानां परिशीलनम् । पुनः तेषां भौतिकपर्यवेक्षणेन सम्बद्धानाम् अभिलेखानां परीक्षणम्।

12. नष्टानां निरुपयुक्तानां च पदार्थानां परित्यागार्थं निर्मितसूच्याः तथा निरूपयुक्तधनराशेश्च परीक्षणम् ।

13. स्थिरकर्मचारिणां सेवापुस्तिकायाः व्यक्तिगतपुस्तिकायाश्च परीक्षणम् ।

14. सर्वकारीयमानितसंस्थाभ्यः पदार्थानां क्रयणावसरे अनुसृतानां प्रक्रमाणां विवरणोपेतायाः पुस्तिकायाः परीक्षणम्। क्रयणसमितेः माध्यमेन क्रीतं वा नवेति परीक्षणम्।

15. वार्षिकसहकारानुबन्धः बाह्यसंस्थाभिः सह कृतश्चेत् तर्हि तत्परिशीलनम् ।

16. न्यायालयाभियोगादीनां सत्वे तेषां परिशीलनम् । आर.टि.आइ .सम्बद्धानां दत्तांशानां परिशीलनम्।

17. चेक बुक इत्यस्य जि.पि.एफ् .कोषस्य तथा सामान्यकोषस्य च परिशीलनम् ।

18. व्ययपत्रस्य कर्मचारिणां आयकरविभागसम्बद्धपत्रावलीनां च परिशीलनम् ।

19. व्ययार्थं निर्दिष्टधनराशेः अपेक्षया ऊर्ध्वं व्ययितस्य धनराशेः सकारणं परिशीलनम् ।

20. आयकरविभागसम्बद्धाभिलेखानां व्यवस्थापनक्रमपरिशीलनम् ।

21. पूर्ववर्षस्य पञ्जिकायाः पर्यवेक्षणम् ।

22. प्रधानव्ययपञ्जिकायाः अवलोकनम् ।

23. नष्टधनपदार्थादीनां विवरणपञ्जिकायाः अवलोकनम्

24. ग्रन्थालयीयपरीक्षितपुस्तकसम्बद्धप्रतिवेदनस्य अवलोकनम् ।

25. सक्रिययोजनानां तत्सम्बद्धाभिलेखानां च परीक्षणम्।

एतत्सर्वं कार्यं आन्तरवित्तलेखाङ्केक्षणेन सम्बद्धं वर्तते। सम्पूर्णविश्वविद्यालयः अत्र उत्तरदायी भवति। अतः आन्तरवित्तलेखाङ्केक्षणात् पूर्वमेव तदर्थम् अपेक्षितां सर्वविधसिद्धतां सर्वत्र कुर्वन्ति।

2. सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य बाह्यं वित्तलेखाङ्केक्षणम् -

राज्यस्य प्रधानलेखाङ्केक्षणकार्यालयस्य लेखाधिकारिणः बाह्यवित्तलेखाङ्केक्षणस्य कार्यं सम्पादयितुम् आयान्ति। एते विश्वविद्यालयस्य कार्यालयेन व्यवस्थापितानाम् अभिलेखानां परिशीलनं कुर्वन्ति। मासानुगुणं जातस्य व्ययस्य परिशीलनं कुर्वन्ति। वित्तकोषेन सम्बद्धानां समेषां पत्रावलीनाम् निरीक्षणकार्यं सम्पादयन्ति। तेषां निरीक्षणेन सम्बद्धाः प्रधानाः पञ्जिकाः अभिलेखाः च यथा -

1. अनुमोदितानि पदानि तेषां विवरणसम्बद्धा पञ्जिका।

2. कार्यरतानां कर्मचारिणां विवरणपञ्जिका,रिक्तपदानि च।

3. वित्तकोषस्य विविधानि विगणनानि ।

4. सेवाप्रदानसंस्थासम्बद्धानुबन्धानां पञ्जिका।

5. वाहनानां सङ्ख्या। तेषां निर्वहणव्ययः ।

6. सञ्चितकोषाः ।

7. बाह्यकर्मचारिणां विवरणपञ्जिका ।

8. आन्तरिकवित्तलेखाङ्केक्षणस्य प्रतिवेदनपत्राणि।

9. विभागीयलेखाङ्केक्षणम् ।

10. पूर्वतनलेखाङ्केक्षणसन्दर्भे उद्भाविताः समस्याः समाधानानि ।

11. ग्रन्थालयपञ्जिका।

12. क्रीतानां पदार्थानां विवरणपञ्जिका।

13. धनस्य अपव्ययेन अतिव्ययेन च सम्बद्धाः पञ्जिकाः ।

14. एकस्मिन् वर्षे सम्पादितानां साधितानां च कार्याणां विवरणम् ।

15. राजस्वसङ्क्रमणस्य विवरणम्।

16. यात्राविरामप्रवासादिभिः सम्बद्धाः अभिलेखाः ।

एवं बहुविधपत्राणां पञ्जिकानाम् अभिलेखानां पर्यवेक्षणात् परं अधीक्षकान् स्पष्टीकरणं पृच्छन्ति। तदग्रे प्रतिवेदनं सिद्धं भवति। सामान्यतः वित्तीयसन्देहान् अधीक्षकः परिहरति चेत्तर्हि तदग्रे । तदभावे सकारणसूचनायाः उल्लेखम् अधिकारिणः कुर्वन्ति।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103 |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://ssvv.ac.in/CSIX) |

***6.4.2 Funds/ Grants received from non-government bodies, individuals, philanthropers during the last five years (not covered in Criterion III) (INR in Lakhs)***

***विगतपञ्चवर्षेषु सर्वकारीयेतरनिकायेभ्यः, व्यक्तिभ्यः, दातृभ्यश्च प्राप्तम् आर्थिकं साहाय्यम् अनुदानं वा (यदि तृतीयनिकषे न निर्दिष्टम्) (लक्षशः रूप्यकेषु)***

**Answer:** 3182.43

6.4.2.1 Total Grants received from non-government bodies, individuals, philanthropers year-wise during the last five years (INR in Lakhs)

विगतपञ्चवर्षेषु सर्वकारीयेतरनिकायेभ्यः, व्यक्तिभ्यः, दातृभ्यश्च प्रतिवर्षं प्राप्तस्य आर्थिकसाहाय्यानुदानस्य वार्षिकयोगः (लक्षशः रूप्यकेषु)

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 658.26270 | 900.01589 | 135.10314 | 692.72595 | 796.32640 |

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103 |
| Details of Funds / Grants received from non-government bodies during the last five years (Data Template) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103 |
| Annual statements of accounts(अङ्केक्षितस्य वार्षिकलेखापत्रस्य प्रतिकृतिः ) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103 |

***6.4.3 Institutional strategies for mobilisation of funds and the optimal utilisation of resources***

***विविधसंसाधनानां सर्वाधिकसमुपयोगार्थं, वित्तराशिसङ्ग्रहार्थञ्च संस्थायाः व्यूहाः।***

**Answer:**

क्षणशः कणशश्चैव विद्यामर्थं च साधयेत् इत्युक्तिं मनसि सङ्कलय्य सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः स्वस्य मानवीयसंसाधनानां भौतिकसंसाधनानां च सदुपयोगार्थं सदैव प्रयतते। विविधसंसाधनानां सदुपयोगः भवेदिति मत्वा स्वकर्मचारिषु अन्यतमान् प्रबन्धकत्वेन पर्यवेक्षकत्वेन संरक्षकत्वेन च नियोजयति । समितीनां मार्गदर्शने सर्वेषां मानवीयसंसाधनानां भौतिकसंसाधनानां च उपयोगः क्रियते। तदर्थं विशिष्टान् व्यूहान् अपि आरचयति विश्वविद्यालयपरिसरः । वित्तव्यवस्थायां विद्यमानैः साधनै सम्भावित धनव्यस्यर क्षणेव अद्य च नूतनराशेः सङ्ग्रहेणवित्तस्य द्वेधा समुचित प्रयोगो भवति। अत्रौभौ भ्रमेण लिख्येते तद्यधा -

**1. विविधसंसाधनानां सर्वाधिकोपयोगसम्बद्धाः व्यूहाः**

1. विश्वविद्यालये सुव्यवस्थितक्रीडाङ्गणानि सन्ति। एतेषां क्रीडाङ्गणानाम् उपयोगः न केवलं क्रीडाकलापानां निमित्तमेव अपि तु बृहत्सभादीनां सङ्घटनावसरे विविधगोष्ठीनां सञ्चालनावसरे च मुक्तसभाङ्गणरूपेणापि क्रियते। युवमहोत्सवादिषु नाट्योत्सवसन्दर्भेषु च सहस्राधिकाः जनाः सम्मिलिताः भवन्ति इत्यतः तस्मिन् सन्दर्भे क्रीडाङ्गणस्य परिपूर्णः उपयोगः जायते।

2. सुव्यवस्थिताः ग्रन्थालयाः सन्ति। एतेषां निर्वाहकाः ग्रन्थपालकाः न केवलं पुस्तकनिर्वहणवितरणादिकं कार्यं कुर्वन्ति अपि तु विश्वविद्यालयेन प्रकाशितानां पुस्तकानां विक्रयणार्थमपि व्यवस्थां कुर्वन्ति। विश्वविद्यालयेन अद्यावधि प्रकाशितानां वेद-शास्त्र-पुराण-इतिहास-काव्य-कोष-स्मृतिग्रन्थानां सन्दर्भग्रन्थानां, विविधशास्त्रकोषग्रन्थानां अन्याभ्योपि संस्थाभ्यः प्रकाशितानि पुस्कानि वर्तते तत्र पठित्वा छात्राः लाभं गृह्णन्ति।

3. व्यायामशालायाः प्रयोगशालायाः गणकशालायाः अन्यासां च संसाधनानाम् उपयोगः व्यायामशालाः प्रयोगशालाः गणकशालाः , प्राविधिकप्रयोगशालाः , सन्ति। व्यायामशालायाः सदुपयोगं छात्राः नियतं कृत्वा शारिरिकसौष्ठवं सम्पादयन्ति। प्रयोगशालाभिः छात्राः प्रत्यक्षरूपेण अधिगच्छन्ति। प्रयोज्यप्रयोजकस्थानापन्नाः छात्राः विविधप्रयोगशालानां साहाय्येन स्वयं प्रयोगं कृत्वा अधिगच्छन्ति।

4. उपवनोद्यानपुष्पवाटिकादीनां सदुपयोगः विश्वविद्यालयस्य परिवेषाः पुष्पोद्यानैः वाटिकाभिः उपवनैश्च सर्वदा सुशोभन्ते । अत्र विकसितानां पुष्पाणां सदुपयोगं सरस्वत्याः पूजने मालानिर्माणप्रसङ्गेषु अर्चनोत्सवादिषु क्रियते।

5. छात्रावास-अतिथिभवन-शिक्षकावासादीनाम् उपयोगः विश्वविद्यालये सुव्यवस्थिताः छात्रावासाः सन्ति। बालकानां बालिकानां च छात्रावासाः सर्वदा पूर्णाः एव भवन्ति। अतिथिभवनानि अपि व्यवस्थितरूपेण सज्जीकृत्य संस्थापितानि सन्ति।

6. कक्ष्यासभाङ्गणान्तर्दौवारिकक्रीडाङ्गणादीनाम् उपयोगः विश्वविद्यालये कक्ष्यासभाङ्गणान्तर्दौवारिकक्रीडाङ्गणादीनाम् उपयोगः नियतरूपेण जायन्ते। रिक्ते समये कक्ष्योत्तरप्रसङ्गेषु च शिक्षकाणाम् उपवेशनादिकं कर्तुमपि कक्ष्यादीनाम् उपयोगः जायते। ग्रीष्मकालिकावकाशेषु अनौपचारिकसंस्कृतशिक्षणादीनां प्रदानावसरे कक्ष्याणाम् उपयोगः जायते। अतः विश्वविद्यालयस्य भौतिकसंसाधनानि विरामदिवसेष्वपि उपयोगयोग्यानि एव भवन्ति बहुधा। वार्षिक परीक्षाषाण्मासिकपरीक्षाकार्यक्रमाः विश्वविद्यालये एवकार्यन्ते तेन विश्वविद्यालस्य धनंव्ययो न्यूनो भवति धनानांमुपयोगश्च भवति।

**2. वित्तराशिसङ्ग्रहार्थं विश्वविद्यालयस्य व्यूहाः**

विश्वविद्यालयः यद्यपि स्वस्य व्ययनिर्वहणाय पूर्णशः राज्यसर्वकारावलम्बितः वर्तते तथापि अयं व्यक्तिशः अपि वित्तराशिसङ्ग्रहार्थं नैकान् व्यूहान् रचयति । क्रमशः यथा -

1. विश्वविद्यालयस्य प्रकाशनविक्रयकेन्द्राणि विश्वविद्यालयस्य उपत्रिशतं प्रकाशनानि क्रयणाय उपलभ्यन्ते। पुस्तकानां विक्रयणेन अद्यावधि लक्षशः रूप्यकाणि विश्वविद्यालयेन अर्जितानि सन्ति। संस्कृतमहोत्सव - पुस्तकमेला च यत्र यत्र प्रचलन्ति तत्र बहुत्र अस्थिरविक्रयणकेन्द्राणि विश्वविद्यालयेन प्रतिष्ठाप्यन्ते । पुस्तकानां क्रेतारः उत्सुकाः भवेयुः इति मध्ये मध्ये मूल्योद्धारमपि उद्घोषयति विश्वविद्यालयः ।

2. न्यासधनसङ्ग्रहव्यूहः विश्वविद्यालये न्यासधनसङ्ग्रहार्थं धनदायिभ्यः दानिभ्यः अवसरः कल्पितः वर्तते। न्यासधनत्वेन लक्षशः धनं दानिभिः प्रदत्तं वर्तते। तैः प्रदत्तधनं मूलधनत्वेन कोषे एव सन्तिष्ठते।तद्धनस्य वार्षिकलाभांशमात्रस्य विनियोगः पुरस्कारसत्कारादीनां निमित्तं क्रियते । विविधमठाधीशैः सामाजिकसङ्घटनैश्च छात्राणां प्रोत्साहनाय न्यासधनं निक्षिप्तं वर्तते।

3. प्राचीनवार्तापत्रिकाणां तदितरपदार्थानां च विक्रयणम् विद्यमानानां प्राचीनवार्तापत्रिकाणां तदितरपदार्थानां च विक्रयणं क्वचित् सम्भवति । अनेन सहस्रशः रूप्यकाणि विश्वविद्यालयेन अर्ज्यन्ते ।

4. अतिथिभवनभाटकधनैः च वित्तसङ्ग्रहणव्यूहः अतिथिभवनेषु वासाय अपि नियमानुगुणं व्यवस्था अस्ति। अल्पमूल्येन सुसज्जितसुन्दरप्रकोष्ठाः सम्बद्धेभ्यः भाटकरूपेण दीयन्ते। तेनापि संस्थायै ईषदिव धनम् उपलभ्यते। शताब्दीभवनं माङ्गलिककार्या च अपि आवण्ट्यते तथोपि धनलाभो भवति।

| File Description | Document |
|---|---|
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://ssvv.ac.in/CSIX) |

### 6.5 Internal Quality Assurance System

***6.5.1 Internal Quality Assurance Cell (IQAC) has contributed significantly for institutionalizing the quality assurance strategies and processes***

***गुणवत्ताश्वासनव्यूहानां प्रक्रियाणां च संस्थानीकरणाय आन्तरिकगुणवत्ताश्वासनकेन्द्रं विशेषतः योगदानं करोति।***

**Answer:**

संस्थायाः आन्तरिकगुणवत्ताश्वासनकेन्द्रं संस्थायाः शैक्षिकस्तराभिवृद्धये स्तरपरिरक्षणाय च कार्यं कुरुते। गुणवत्तापूर्णा नीतिः एव अस्य केन्द्रस्य द्योतकम् विद्यते। नीतेः अनुप्रयोगाय विश्वविद्यालयस्य प्रत्येकस्मिन् अपि अङ्गाय केन्द्रमिदं मार्गदर्शनं करोति। संस्थानीकरणेन उच्चशिक्षासंस्थायाम् अर्थात् सम्पूर्णानन्दसंस्कृतविश्वविद्यालये गुणात्मकसंस्कृतेः विकासः जायते इति आन्तरिकगुणवत्ताश्वासनकेन्द्रं विभावयति। आभ्यन्तरैः बाह्यैः च सहयोगैः विश्वविद्यालयस्य सर्वाङ्गीणविकासं सम्पादयितुम् असौ प्रयतते। अभिवृद्धेः विकासस्य च मितयः काः काः सन्ति इति सर्वदा केन्द्रम् इदं चिन्तनं करोति। अधिगन्तुः केन्द्रितं शैक्षिकं वातावरणं निर्मातुं तदर्थम् अपेक्षितानां परिपक्वदशासम्पन्नानां शिक्षकाणां च सज्जीकर्तुं केन्द्रमिदं चेष्टते।स्वस्य गुणवत्तापरस्य कार्यस्य सम्पादनाय सांस्थानिकैः संस्थान्तरस्थैः सह परिचर्चाम् अपि इदं करोति।
गुणाः पूजास्थानम् इत्युक्तिः प्रसिद्धा एव । एतदनु संस्कृतशिक्षणस्य प्रत्येकस्मिन् अपि पक्षे विद्यमानान् गुणान् आकलयितुम् आवर्धयितुं च आश्वासनं ददाति सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य आन्तरिकगुणवत्ताश्वासनकेन्द्रम् । शिक्षणाधिगमप्रक्रियाभिः सम्बद्धानां समेषां पक्षाणां गुणवत्ताम् अभिवर्धयितुम् अपेक्षितान् व्यूहान् नैरन्तर्येण रचयदस्ति । तत्र हि गुणवत्ताश्वासनव्यूहानां प्रक्रियाणां च संस्थानीकरणाय अनेन केन्द्रेण क्रियमाणाः प्रयासाः यथा -
1. कार्येण सह तत्सम्बद्धगुणवत्तावर्धकमानकानां निर्धारणम् ।
2. शैक्षिकाणां शैक्षिकेतराणां च अधिगमलक्ष्याणां सम्प्राप्तये विद्यमानानां मानदण्डानां निर्धारणम् ।
3. विश्वविद्यालये छात्रकेन्द्रितस्य शैक्षिकवातावरणस्य सर्जनम् ।
4. शिक्षणेन सम्बद्धानां नवाचाराणां अनुप्रयोगाय प्रौद्योगिक्याः आत्मसात्करणाय च शिक्षकाणां प्रचोदनं तेषां सज्जीकरणं च ।
5. सम्पूर्णानन्दसंस्कृतविश्वविद्यालये सर्वोत्तमशिक्षाव्यवस्थायाः संवर्धनदिशि शिक्षकाणां छात्राणाम् अभिभावकानां च अभिप्रायसङ्ग्रहणम्।
6. गुणवत्तापूर्णशैक्षिकवातावरणस्य परिरक्षणाय पूरकाणां कार्यक्रमाणां कार्यशालानां सङ्गोष्ठीनां च आयोजनम्।
7. कालानुगुणं विकासपरकार्याणाम् अभिलेखसङ्ग्रहणम्।
8. राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदः मानकानुगुणं विश्वविद्यालयस्य मूल्याङ्कनयोग्यत्वसम्पादनदृष्ट्या सज्जीकरणम् ।
9. आन्तरिकगुणवत्ताश्वासनकेन्द्रेण सम्बद्धानां सर्वविधानाम् अभिलेखानां वार्षिकप्रतिवेदनानां पञ्जिकानां च व्यवस्थिरूपेण सम्पादनम् ।
आन्तरिकगुणवत्ताश्वासनकेन्द्रेण कृतानां कार्याणाम् आमूलचूलं परिशीलनं राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदः निरीक्षणावसरे जायते। अतः आन्तरिकगुणवत्ताश्वासनकेन्द्रं स्वकर्तव्यानि सर्वदा निर्वहति। तत्कर्तव्यानि यथा -
1. प्रभावपूर्णनेतृत्ववहनम्
2. प्रबन्धने भागग्रहणम्
3. क्रियासाध्यानां योजनानां निर्माणम्
4. वैद्यु तिकप्रशासनव्यवस्थायाः प्रशंसनं प्रोत्साहनं च
5. विभिन्नानां निकायानां विभागानां प्रकोष्ठानां कक्षाणां च प्रभावस्य मापनं तेषां प्रोत्साहनम्
6. आर्थिकसहयोगप्रदानम्
7. व्यावसायिकविकाससम्पादनम्
8. शिक्षणेन सह इतरशैक्षिकक्रियाकलापेषु भागग्रहणाय प्रचोदनम्
9. शैक्षिकलेखाङ्केक्षणस्य प्राशासनिकलेखाङ्केक्षणस्य प्रतिवेदननिर्माणम्
10. विभिन्नप्रत्यायनप्रसङ्गेषु भागग्रहणम्
आन्तरिकगुणवत्ताश्वासनकेन्द्रस्य प्रधानं कार्यम् अस्ति यत् अस्य हितधारकाणां चिन्तनेषु नवाचाराणां समावेशः । वर्तमानकार्यप्रणालीम् अवगमयितुम् आन्तरिकगुणवत्ताश्वासनकेन्द्रं सर्वदा प्रयतते। गुणवत्तापूर्णसंस्कृतेः स्वायत्तीकरणाय अपेक्षितान् व्यूहान् काले काले संरचयति। अस्य सदस्याः सर्वे मुक्तकण्ठेन गुणवत्तासंवर्धनोपायान् मण्डयितुं समर्थाः सन्ति। आन्तरिकगुणवत्ताश्वासनकेन्द्रस्य परिपूर्णं सहयोगं स्वीकृत्य एव विश्वविद्यालयः प्रतिपदं कार्यं करोति। अतः विश्वविद्यालयस्य स्तरः समेधमानः एव वर्तते। सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य साहित्यव्याकरणन्यायसर्वदर्शनशिक्षाशास्त्रादिषु विभागेषु अपेक्षितसाहाय्यं कर्तुं केन्द्रमिदं सर्वदा

सन्नद्धं भवति। संस्थायाः निर्णयेषु उत्कृष्टतायाः परिरक्षणे अपि अस्य अनितरसाधारणं योगदानम् अस्ति। अनुसन्धानविभागे अपि अस्य महत्वपूर्णं योगदानं वर्तते। यथा -

1. प्राक्शोधपाठ्यक्रमार्थं प्रशिक्षणसन्दर्भे
2. शोधच्छात्राणां मार्गदर्शनवेलायाम्
3. शोधकर्मणि गुणवत्तासंवर्धनसन्दर्भे
4. पुस्तकालयस्य उद्विकाससन्दर्भे
5. शिक्षकाणां व्यावसायिकाभिक्षमतायाः अभिवर्धनप्रसङ्गे
6. अपेक्षितसंसाधनानां व्यवस्थापनप्रसङ्गे च

आन्तरिकगुणवत्ताश्वासनकेन्द्रेण सर्वेषु विभागेषु विशिष्टाः गुणवत्तापूर्णाः च कार्यक्रमाः आयोज्यन्ते। यथा-

वृक्षारोपणम् - वृक्षो रक्षति रक्षितः इति उच्यते। वृक्षैः प्राणवायुरपि प्रचुरमात्रेण लभ्यते। अनेन मानवीयतत्त्वानां समेषां स्वास्थ्यं संवर्धते ।

कर्गजरहितकार्यम् - मितव्ययी परिसरः भवेत्। अतः अत्यन्तम् अनिवार्यं चेत्तर्हि कर्गजानां प्रयोगः कर्त्तव्यः इति हितोपदेशाय केन्द्रमिदं सर्वान् प्रचोदयति।

प्लास्टिक् पदार्थानां रासायनिकौषधानां च उन्मूलनम् - परिसरस्य परिवेषः प्लास्टिक् - पदार्थैः मुक्तः भवेत्। विश्वविद्यालये रासायनिकपदार्थानाम् उपयोगः अपि यथासम्भवं न स्यात् इति स्थानीयकेन्द्रं चिन्तयति।

स्वच्छता सुन्दरीकरणं च - परिसरस्य स्वच्छतापरिरक्षणे सौन्दर्यवर्धने च केन्द्रं सर्वदा मार्गदर्शनं करोति।

पर्यावरणपरिरक्षणदिवसाचरणम्, स्वच्छभारताभियानम् - विश्वविद्यालये पर्यावरणपरिरक्षणदिवसाचरणावसरे स्वच्छभारताभियाने च केन्द्रमिदं प्रचोदककार्यं करोति।

एवं विश्वविद्यालयस्य आन्तरिकगुणवत्ताश्वासनकेन्द्रं स्थानीयस्तरानुरूपं चिन्तनं करोति वैश्विकस्तरानुरूपं कार्यं करोति।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103 |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://www.ssvv.ac.in/details/125) |

***6.5.2 The institution reviews its teaching learning process, structures & methodologies of operations and learning outcomes at periodic intervals through IQAC set up as per norms***

***संस्था आन्तरिकगुणवत्ताश्वासनकेन्द्रद्वारा निर्धारितनियमानुरूपं नियतकालेषु अध्यापनाधिगमप्रक्रियायाः, तत्र उपयुज्यमानायाः पद्धतेः, अधिगमपरिणामस्य च समीक्षां करोति।***

**Answer:**

संस्थायाः आन्तरिकगुणवत्ताश्वासनकेन्द्रं संस्थायाः शैक्षिकस्तराभिवृद्धये स्तरपरिरक्षणाय च कार्यं कुरुते। गुणवत्तापूर्णा नीतिः एव अस्य केन्द्रस्य द्योतकम् विद्यते। नीतेः अनुप्रयोगाय विश्वविद्यालयस्य प्रत्येकस्मिन् अपि अङ्गाय केन्द्रमिदं मार्गदर्शनं करोति। संस्थानीकरणेन उच्चशिक्षासंस्थायाम् अर्थात् सम्पूर्णानन्दसंस्कृतविश्वविद्यालये गुणात्मकसंस्कृतेः विकासः जायते इति आन्तरिकगुणवत्ताश्वासनकेन्द्रं विभावयति। आभ्यन्तरैः बाह्यैः च सहयोगैः विश्वविद्यालयस्य सर्वाङ्गीणविकासं सम्पादयितुम् असौ प्रयतते। अभिवृद्धेः विकासस्य च मितयः काः काः सन्ति इति

सर्वदा केन्द्रम् इदं चिन्तनं करोति। अधिगन्तुः केन्द्रितं शैक्षिकं वातावरणं निर्मातुं तदर्थम् अपेक्षितानां परिपक्वदशासम्पन्नानां शिक्षकाणां च सज्जीकर्तुं केन्द्रमिदं चेष्टते।स्वस्य गुणवत्तापरस्य कार्यस्य सम्पादनाय सांस्थानिकैः संस्थान्तरस्थैः सह परिचर्चाम् अपि इदं करोति।

गुणाः पूजास्थानम् इत्युक्तिः प्रसिद्धा एव । एतदनु संस्कृतशिक्षणस्य प्रत्येकस्मिन् अपि पक्षे विद्यमानान् गुणान् आकलयितुम् आवर्धयितुं च आश्वासनं ददाति सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य आन्तरिकगुणवत्ताश्वासनकेन्द्रम् । शिक्षणाधिगमप्रक्रियाभिः सम्बद्धानां समेषां पक्षाणां गुणवत्ताम् अभिवर्धयितुम् अपेक्षितान् व्यूहान् नैरन्तर्येण रचयदस्ति । तत्र हि गुणवत्ताश्वासनव्यूहानां प्रक्रियाणां च संस्थानीकरणाय अनेन केन्द्रेण क्रियमाणाः प्रयासाः यथा -

1. कार्येण सह तत्सम्बद्धगुणवत्तावर्धकमानकानां निर्धारणम् ।

2. शैक्षिकाणां शैक्षिकेतराणां च अधिगमलक्ष्याणां सम्प्राप्तये विद्यमानानां मानदण्डानां निर्धारणम् ।

3. विश्वविद्यालये छात्रकेन्द्रितस्य शैक्षिकवातावरणस्य सर्जनम् ।

4. शिक्षणेन सम्बद्धानां नवाचाराणां अनुप्रयोगाय प्रौद्योगिक्याः आत्मसात्करणाय च शिक्षकाणां प्रचोदनं तेषां सज्जीकरणं च ।

5. सम्पूर्णानन्दसंस्कृतविश्वविद्यालये सर्वोत्तमशिक्षाव्यवस्थायाः संवर्धनदिशि शिक्षकाणां छात्राणाम् अभिभावकानां च अभिप्रायसङ्ग्रहणम्।

6. गुणवत्तापूर्णशैक्षिकवातावरणस्य परिरक्षणाय पूरकाणां कार्यक्रमाणां कार्यशालानां सङ्गोष्ठीनां च आयोजनम्।

7. कालानुगुणं विकासपरकार्याणाम् अभिलेखसङ्ग्रहणम्।

8. राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदः मानकानुगुणं विश्वविद्यालयस्य मूल्याङ्कनयोग्यत्वसम्पादनदृष्ट्या सज्जीकरणम् ।

9. आन्तरिकगुणवत्ताश्वासनकेन्द्रेण सम्बद्धानां सर्वविधानाम् अभिलेखानां वार्षिकप्रतिवेदनानां पञ्जिकानां च व्यवस्थिरूपेण सम्पादनम् ।

आन्तरिकगुणवत्ताश्वासनकेन्द्रेण कृतानां कार्याणाम् आमूलचूलं परिशीलनं राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदः निरीक्षणावसरे जायते। अतः आन्तरिकगुणवत्ताश्वासनकेन्द्रं स्वकर्तव्यानि सर्वदा निर्वहति। तत्कर्तव्यानि यथा -

1. प्रभावपूर्णनेतृत्ववहनम्

2. प्रबन्धने भागग्रहणम्

3. क्रियासाध्यानां योजनानां निर्माणम्

4. वैद्यु तिकप्रशासनव्यवस्थायाः प्रशंसनं प्रोत्साहनं च

5. विभिन्नानां निकायानां विभागानां प्रकोष्ठानां कक्षाणां च प्रभावस्य मापनं तेषां प्रोत्साहनम्

6. आर्थिकसहयोगप्रदानम्

7. व्यावसायिकविकाससम्पादनम्

8. शिक्षणेन सह इतरशैक्षिकक्रियाकलापेषु भागग्रहणाय प्रचोदनम्

9. शैक्षिकलेखाङ्केक्षणस्य प्राशासनिकलेखाङ्केक्षणस्य प्रतिवेदननिर्माणम्

10. विभिन्नप्रत्यायनप्रसङ्गेषु भागग्रहणम्

आन्तरिकगुणवत्ताश्वासनकेन्द्रस्य प्रधानं कार्यम् अस्ति यत् अस्य हितधारकाणां चिन्तनेषु नवाचाराणां समावेशः । वर्तमानकार्यप्रणालीम् अवगमयितुम् आन्तरिकगुणवत्ताश्वासनकेन्द्रं सर्वदा प्रयतते। गुणवत्तापूर्णसंस्कृतेः स्वायत्तीकरणाय अपेक्षितान् व्यूहान् काले काले संरचयति। अस्य सदस्याः सर्वे मुक्तकण्ठेन गुणवत्तासंवर्धनोपायान् मण्डयितुं समर्थाः सन्ति। आन्तरिकगुणवत्ताश्वासनकेन्द्रस्य परिपूर्णं सहयोगं स्वीकृत्य एव विश्वविद्यालयः प्रतिपदं कार्यं करोति। अतः विश्वविद्यालयस्य स्तरः समेधमानः एव वर्तते। सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य साहित्यव्याकरणन्यायसर्वदर्शनशिक्षाशास्त्रादिषु विभागेषु अपेक्षितसाहाय्यं कर्तुं केन्द्रमिदं सर्वदा सन्नद्धं भवति। संस्थायाः निर्णयेषु उत्कृष्टतायाः परिरक्षणे अपि अस्य अनितरसाधारणं

योगदानम् अस्ति। अनुसन्धानविभागे अपि अस्य महत्वपूर्णं योगदानं वर्तते। यथा -

1. प्राक्शोधपाठ्यक्रमार्थं प्रशिक्षणसन्दर्भे

2. शोधच्छात्राणां मार्गदर्शनवेलायाम्

3. शोधकर्मणि गुणवत्तासंवर्धनसन्दर्भे

4. पुस्तकालयस्य उद्विकाससन्दर्भे

5. शिक्षकाणां व्यावसायिकाभिक्षमतायाः अभिवर्धनप्रसङ्गे

6. अपेक्षितसंसाधनानां व्यवस्थापनप्रसङ्गे च

आन्तरिकगुणवत्ताश्वासनकेन्द्रेण सर्वेषु विभागेषु विशिष्टाः गुणवत्तापूर्णाः च कार्यक्रमाः आयोज्यन्ते। यथा-

वृक्षारोपणम् - वृक्षो रक्षति रक्षितः इति उच्यते। वृक्षैः प्राणवायुरपि प्रचुरमात्रेण लभ्यते। अनेन मानवीयतत्त्वानां समेषां स्वास्थ्यं संवर्धते ।

कर्गजरहितकार्यम् - मितव्ययी परिसरः भवेत्। अतः अत्यन्तम् अनिवार्यं चेत्तर्हि कर्गजानां प्रयोगः कर्त्तव्यः इति हितोपदेशाय केन्द्रमिदं सर्वान् प्रचोदयति।

प्लास्टिक् पदार्थानां रासायनिकौषधानां च उन्मूलनम् - परिसरस्य परिवेषः प्लास्टिक् - पदार्थैः मुक्तः भवेत्। विश्वविद्यालये रासायनिकपदार्थानाम् उपयोगः अपि यथासम्भवं न स्यात् इति स्थानीयकेन्द्रं चिन्तयति।

स्वच्छता सुन्दरीकरणं च - परिसरस्य स्वच्छतापरिरक्षणे सौन्दर्यवर्धने च केन्द्रं सर्वदा मार्गदर्शनं करोति।

पर्यावरणपरिरक्षणदिवसाचरणम्, स्वच्छभारताभियानम् - विश्वविद्यालये पर्यावरणपरिरक्षणदिवसाचरणावसरे स्वच्छभारताभियाने च केन्द्रमिदं प्रचोदककार्यं करोति।

एवं विश्वविद्यालयस्य आन्तरिकगुणवत्ताश्वासनकेन्द्रं स्थानीयस्तरानुरूपं चिन्तनं करोति वैश्विकस्तरानुरूपं कार्यं करोति।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103 |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://www.ssvv.ac.in/details/125) |

***6.5.3 Number of quality initiatives by IQAC for promoting quality culture per year***

***प्रतिवर्षम् आन्तरिकगुणवत्ताश्वासनकेन्द्रेण गुणवत्तासंस्कृतिविकासार्थम् आयोजितानां गुणवत्तोपक्रमाणां सङ्ख्या।***

**Answer:** 6

6.5.3.1 Number of quality initiatives by IQAC for promoting quality year-wise for the last five years

प्रतिवर्षम् आन्तरिकगुणवत्ताश्वासनकेन्द्रेण (आ. गु. आ. के.) गुणवत्तासंस्कृतिविकासार्थमायोजितानां गुणवत्तोपक्रमाणां विगतपञ्चवर्षाणां सङ्ख्या।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 3 | 0 | 2 | 0 | 1 |

| File Description | Document |
|---|---|
| Number of quality initiatives by IQAC per year for promoting quality culture (Data Template) (आन्तरिकगुणवत्ताश्वासनकेन्द्रेण गुणवत्तासंस्कृतिविकासार्थमायोजितानां गुणवत्तोपक्रमाणां सङ्ख्या। (दत्तांशप्रारूपम्)) | View Document (https://assessmentonline.naac.gov.in/storage/app/he |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://www.ssvv.ac.in/details/125) |
| IQAC link(आ.गु.आ.के.द्वारा आयोजितस्य गुणवत्तोपक्रमस्य सन्धानम्।) | View Document (https://ssvv.ac.in/CSIX) |

***6.5.4 Quality assurance initiatives of the institution include:***

***1. Regular meeting of Internal Quality Assurance Cell (IQAC);***

***2. Timely submission of Annual Quality Assurance Report (AQAR) to NAAC***

***3. Academic Administrative Audit (AAA) and initiation of follow up action***

***4. Participation in NIRF***

***5. UGC Recognition for any other Academic Excellence or any other quality audit recognized by state, national agencies.***

***संस्थायाः गुणवत्ताश्वासनोपक्रमेषु अन्तर्भूताः सन्ति -***

***1. आ.गु.आ.केन्द्रस्य नियमितमुपवेशनम्,***

***2. रा.मू.प्र.परिषदे समयेन वार्षिकगुणवत्ताश्वासनप्रतिवेदनसमर्पणम् ।***

***3. शैक्षिकं प्राशासनिकं लेखापत्रम्, अनुगतक्रियाणामुपक्रमणम् ।***

***4. राष्ट्रियसांस्थिकश्रेणिकरूपरेखायां भागग्रहणम् ।***

***5. विश्वाविद्यालयानुदानायोगेन मान्यताप्राप्तः यः कश्चन शैक्षिकोत्कर्षः अथवा राष्ट्र/राज्य अभिकरणैः मान्यताप्राप्तं किमपि गुणावत्ताङ्केक्षणम्।***

**Answer:** A. Any 4 of the above (अ. उपर्युक्तेषु केचन चत्वारः)

| File Description | Document |
|---|---|
| Upload details of Quality assurance initiatives of the institution (Data Template)(संस्थायाः गुणवत्तोपक्रमाणां विवरणम्। (दत्तांशप्रारूपम्)) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/1( |

| | |
|---|---|
| Paste web link of Annual reports of University(विश्वविद्यालयस्य वार्षिकं प्रतिवेदनस्य सन्धानं प्रयच्छत।) | View Document (https://www.ssvv.ac.in/details/125) |

***6.5.5 Incremental improvements made during the preceding five years (in case of first cycle)***

***Post accreditation quality initiatives (second and subsequent cycles)***

***गतपञ्चवर्षेषु सम्पादिताः क्रमविकासाः (प्रथमचक्रसन्दर्भे)***

***प्रत्यायनोत्तरं कृताः गुणवत्तोपक्रमाः (द्वितीयादिचक्रेषु)***

**Answer:**

उत्तरोत्तरं विकासं कामयमानः विश्वविद्यालयः विगतेषु पञ्चसु वर्षेषु यथाशक्ति स्वीये शैक्षिके प्राशासनिके च क्षेत्रे गुणाभिवर्धनाय प्रायतत। कोरोना-कारणेन अर्थात् विषमपरिस्थितेः प्रभावेण मध्ये यद्यपि अवरोधः जातः तथापि विश्वविद्यालयस्य विकासः द्रुतगत्या जायमानः वर्तते। नूतनस्य अधिनियमस्य अध्यादेशेषु प्रशासनस्य स्वरूपं कार्यप्रणाली च वर्णिता अस्ति। विश्वविद्यालयस्य शैक्षिके प्राशासनिके च कार्ये सम्प्रति आधुनिकप्रौद्योगिक्याः पूर्णशः अनुप्रयोगः जायमानः वर्तते। वैद्यु तिकप्राशासनिकव्यवस्थायाः अनुप्रयोगेण सर्वाणि कार्याणि द्रुतगत्या जायमानानि सन्ति। क्रमशः यथा -

1. विगतपञ्चवर्षेषु प्राशासनिकक्षेत्रस्य गुणाभिवर्धने कृताः सफलप्रयासाः ।

विकासो नाम परिवर्तनम् । तच्च गतेषु पञ्चसु वर्षेषु बहुधा जातमेव । विगतपञ्चवर्षेषु प्राशासनिकसंरचनायां परिवर्तनं जातमस्ति।

2. विगतपञ्चवर्षेषु शैक्षिकक्षेत्रस्य गुणाभिवर्धने कृताः सफलप्रयासाः ।

शिक्षैका तु श्रुतेरङ्गं शिक्षान्या श्रुतिचोदिता इति वृद्धवचनम्। संस्कृतशिक्षायाः अर्थात् वेद-वेदाङ्ग-दर्शन-व्याकरणपुराणेतिहासादीनां पारम्परिकपाठ्यक्रमाणां सञ्चालनाय विश्वविद्यालयः सर्वदा यत्नशीलः अस्ति। अन्येऽपि गुणाभिवर्धने कृताः सफलप्रयासाः यथा -

1. विश्वविद्यालयस्य आन्तरिकगुणवत्ताश्वासनकेन्द्रं सर्वदा गुणाभिवर्धनोपायान् संसूचयति। गुणाभिवर्धनस्य मानकान् च निर्धारयति। अस्य केन्द्रस्य प्रभावेण संस्कृतशिक्षणस्य सर्वेषु विभागेषु गुणाभिवर्धनं जायमानम् अस्ति। उपवेशनेषु सर्वदा पुरोगतेः विषयेषु क्रियापराः योजनाः निर्धार्यन्ते। 2019 तः 2023 पर्यन्तम् आन्तरिकगुणवत्ताश्वासनकेन्द्रस्य बहु सङ्ख्याकानि उपवेशनानिध्सभाः संवृत्ताः । एषु उपवेशनेषु विश्वविद्यालयेन संसाधितानां सफलकार्यक्रमाणां चिन्तनं सम्भवति ।

2. विगतेषु पञ्चसु वर्षेषु नूतनानां पाठ्यक्रमाणाम् अनुप्रयोगेण जातस्य गुणाभिवृद्धेः परिशीलनमपि क्रियते। यद्यपि एनं विश्वविद्यालयं विहाय अन्येऽपि संस्कृतोच्चशिक्षासंस्थाः भारते सन्ति तथापि अस्य पाठ्यक्रमाः आभारतं व्याप्ताः सन्ति। आसेतुहिमाचलं प्रसिद्धे उ0प्र0राज्य विश्वविद्यालये छात्राः शिक्षां प्राप्नुवन्ति।

3. संस्कृतशिक्षणे प्रसारे विकासे च सर्वकारस्य माध्यमसंस्थारूपेण अयं विश्वविद्यालयः स्वीयां भूमिकां वहति। छात्रेभ्यः आवासभोजनाद्याः सकलाः व्यवस्थाः सन्ति इत्यतः आवासीयविश्वविद्यालये अस्मिन् शिक्षां प्राप्तुं छात्राणां कृते क्लेशाः न भवन्ति।

4. शोधच्छात्राः संस्कृतेन एव शोधपत्राणि शोधप्रबन्धान् च लिखन्ति। विश्वविद्यालयस्य शोधपत्रिकाः प्ौछ संख्याया राजन्ते। सारस्वती सुषमा, प्राची, गाण्डीवम् , विश्वविद्यालय वार्ता इत्याद्याः शोधपत्रिकाः शैक्षिकगुणाभिवृद्धिं साङ्केतिकरूपेण प्रकटयन्ति।

5. शैक्षिकनवाचारेषु अपि विश्वविद्यालयः अग्रेसरः वर्तते। कोरोनाकाले अपि अविच्छिन्नरूपेण शैक्षिकगुणाभिवर्धनाय गूगल मीट, जूम, स्कैपे इत्यादीनाम् अन्तर्जालाश्रितानां माध्यमानां साहाय्येन परोक्षं शिक्षा प्रदत्ता एव । अतः शैक्षिकगुणाभिवृद्धिः अस्खलितरूपेण जायते।

| File Description | Document |
|---|---|
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document (https://ssvv.ac.in/CSIX) |

## 7.Institutional Values and Best Practices

### 7.1 Institutional Values and Social Responsibilities

***7.1.1 Number of gender equity promotion Programmes organized by the institution during the last five years.***

***विगतपञ्चवर्षेषु संस्थया लैङ्गिकसमतायाः संवर्धनाय निर्वर्तितानां कार्यक्रमाणां सङ्ख्या।***

**Answer:** 10

7.1.1.1 Number of gender equity promotion Programmes organized by the institution year-wise during the last five years

विगतपञ्चवर्षेषु संस्थया लैङ्गिकसमतायाः संवर्धनाय निर्वर्तितानां कार्यक्रमाणां वार्षिकसङ्ख्या।

Answer:

| 2022-23 | 2021-22 | 2020-21 | 2019-20 | 2018-19 |
|---|---|---|---|---|
| 03 | 01 | 02 | 02 | 02 |

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/7.1 |
| Report of the event कार्यक्रमस्य प्रतिवेदनम् | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/7.1 |
| List of gender equity promotion Programmes organized by the institution (Data Template) संस्थया लैङ्गिकसमतायाः संवर्धनार्थं निर्वर्तितानां कार्यक्रमाणां सूची। (दत्तांशप्रारूपम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/7.1 |

***7.1.2 Institution shows gender sensitivity in providing facilities such as:***

***1. Safety and Security***

***2. Counselling***

***3. Common Room***

***संस्था अधोलिखितसौविध्यानि प्रदाय लैङ्गिकसंवेदनशीलतां व्यवस्थापयति।***

***1. निरुपद्रवता सुरक्षा च***

***2. परामर्शः***

***3. समानप्रकोष्ठः***

**Answer:**

कान्ता पुरूषस्य सहयोगिनीरूपेण विलसति। सा न केवलं यज्ञादावेवपुरूषसानिध्यम् आशिश्रियत्, अपितु भीषणे समरे अपि सा सेनानित्वम् अलंचकार। समसामयिके काले योषिताभिः समं लैंगिकसमानतायाः सम्पत्तये नैके नियमाः, आनुकूल्यताः, तदनुकूलसौविध्यानि समाजे अस्मिन् सामाजिकाः आश्रयन्ति। इयं संस्था अपि वेद इव योषा न अबला अपितु सुवीरा शूरपत्नी इत्यादिरूपेण आमन्यते। ताभिः साकं लैंगिकसमानता यथास्यात् तथा स्वानुरूपान् नियमान् आरचयति। अस्माकं समाजे योषितानां संरक्षणाय अधिकारस्य साम्यता सम्पत्तये च विश्वविद्यालये अस्मिन् विविधाः समितयः निर्मिताः सन्ति। यथा-साम्प्रतकाले यौनहिंसायाः प्राचुर्यं परिदृश्य तत्प्रतिषेधार्थं यौन-उत्पीडन-निषेधसमितिः परिकल्पिता वर्तते। विविधेषु संस्थानेषु पुरातनछात्रैः द्वारा नवागतानां छात्राणां प्रति दुर्व्यवहारवशात् नैकाः पुरातनछात्रैः द्वारा घटनाः दरीदृष्यते। ताः च अत्र न स्यात् इति ताः परिलक्ष्य एण्टीरैगिंग-समितिः निर्मिता वर्हति।

इह सुविपुले संस्कृतवाङ्मये महकवेः वाल्मीकेः नाम वियति तरणिः इव विद्योततेतमाम् । ते धर्मार्थकाममोक्षात्यकं चतुर्वर्गोवदेष्टारम, आदर्शसंस्थापकं, सर्वजनग्राह्यं, रामायणाभिधेयम् आदिकाव्यं महाकाव्यात्मकं रचयांचकुः । तत्र विश्रुताः याः नैतिकशिक्षाः, अथ च महर्षिकृष्णद्वैपायनेन प्रवीतं धर्मे, अर्थे च कामे च मोक्षे च भरतर्षभ। यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् इत्यादिरीत्या सर्वार्थबोधकम् यन्महाभारतं तद्घटकम् अंशविशेषं कस्य न विदितं विपश्चितः भगवद्गीतायाः गुणगौरवम्  तत्र विहितं यदुपनिषदां सारभागं श्रुतिसारं च तदाधारिताः भारतीयज्ञानपरम्परानुरूपाः चारित्र्यचारूबोधकाः शिक्षाः अंगीकृताः अनेन संस्थानेन।

तस्यैव फलविशेषः अयं यत् राष्ट्रियानां महोत्सवानां स्वातन्त्र्यदिवस , शिक्षकदिवस-कर्तव्यबोधदिवस-सम्बिधानदिवस-गणतन्त्र दिवसादिप्रभृतीनां कार्यक्रमाणां प्रतिवर्षं समुत्साहेन समायोजनं दरीदृष्यते। यथाकाले समाजोपकारकाणां चरित्रचिन्तनचतुराणां प्रशस्तमार्गोपदेष्टानां महापुरूषाणां जन्मदिवसमुपलक्ष्य पुण्यतिथिमुपलक्ष्य च नैकान् कार्यक्रमान् आयोजयति विश्वविद्यालयः अयम्। यथा पीडित-शोषित-दलितवर्ग-विपज्ज्वालादग्धचेतसां महात्मनां गान्धिमहोदयानाम् जन्मदिवसमुपलक्ष्य प्रतिवर्षम् अक्टूबरमासस्य द्वितारिकायाम् अनेकान् कार्यक्रमान् समायोजयति। तदवदेव अम्बेडकर जयन्तिः स्वामी विवेकानन्द जयन्ति डॉ. सम्पूर्णानन्द जयन्ति डॉ. कमलापति-त्रिपाठिजयन्ति, इत्यादयः।

यद्यपि बनिता स्वयमेव शक्तिरूपा तथापि साम्प्रतिके काले सीमन्तिनीनाम् लोके शक्ति सम्पृक्तार्थं विश्वविद्यालयेन महिला-सशक्तिकरण-समितिः निर्मिता। अप्रियघटना काचन माभूत् तदर्थं महिलाछात्रावासस्य विभिन्नेषु स्थानेषु सी.सी.टी.वी. कैमराणि स्थापितानि सन्ति। स्त्री-सम्बन्धितानां मर्यादानाम् अधिकारणां च विषये परिक्षेत्रे निवासिनां योषितानां सौलभ्याय स्वकीया सामाजिकी स्थितिः केति अवबोधनाय महिला-अध्ययन केन्द्रं आव्यतिष्ठत्। काले-काले योषानाम् शारीरिक मानसिक-स्वास्थ्यं परिलक्ष्य स्वकीया सुरक्षा स्वैनैव कथं करणीयेति लोके स्वाधिकारं प्रति जागरूकता कथं भवेदिति वा विषयान् अवलम्व्य विविधाः कार्यक्रमाः चाल्यते। विश्वविद्यालयसम्बध्दस्य आयुर्वेदमहाविद्यालयस्य बैद्यैः प्रतिस्विकेषु ग्रामेषु जनानां चिकित्सकीयं परिक्षणं, शरीरसम्भरणपोषणादिः कथं भवेत् इत्यादिकं प्रति अनुसरणीयं मार्गं दर्शितम्। नारीणां संवैधानिकानाम् अधिकारणां परिपोषणाय नागरिकाचारसंहितायाः सम्यक्परिपालनाय नैकाः कार्यक्रमाः आयोजिताः सन्ति। येषु विश्वविद्यालयस्य अध्यापकाः, अधिकारिणः, कर्मचारिणः, छात्राः, क्षेत्रीयनार्यः भागं गृह्णन्ति।

विगतवर्षेषु लैंगिकसमानतायाः सम्पत्यर्थं शास्त्रीयज्ञानावाप्तये बालिकाः विशेषरूपेण प्रोत्साहिताः विश्वविद्यालयेन। तद्नुरूपं च वेदेषु, ज्योतिषेषु कर्मकाण्डेषु, दर्शनादिविषयेषु प्रवेशाय पात्रतामापदण्डेष नियमेषु शैथिल्यम् अंगीकृत्य तासां प्रवेशः उपवृंहितः।

| File Description | Document |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006/7.1.2 |

***7.1.3 Alternate Energy initiatives such as:***

***Percentage of power requirement of the university met by the renewable energy sources (preceding academic year data)***

***वैकल्पिकस्य ऊर्जसः उपक्रमाः यथा-***

***विश्वविद्यालयेन उपयुज्यमानायाः विद्युच्छक्तेः पुनर्नवीकरणयोग्येभ्यः ऊर्जस्स्रोतोभ्यः आपूर्तेः प्रतिशतता- (प्रगताध्ययनवर्षस्य दत्तांशः)***

**Answer:** 30.46

7.1.3.1 Annual power requirement met by renewable energy sources (in KWH)

आवश्यक्याः वार्षिकविद्युच्छक्तेः पुनर्नवीकरणयोग्येभ्यः ऊर्जस्स्रोतोभ्यः आपूर्तिः।

Answer: 416.976

7.1.3.2 Annual power requirement of the institution (in KWH)

संस्थायाः वार्षिकविद्युच्छक्तेः आवश्यकता।

Answer: 1368.8

| File Description | Document |
|---|---|
| Upload details of power requirement of the university met by renewable energy sources (Data Template) विश्वविद्यालयेन उपयुज्यमानायाः विद्युच्छक्तेः पुनर्नवीकरणयोग्येभ्यः ऊर्जस्स्रोतोभ्यः आपूर्तेः विवरणम्। (दत्तांशप्रारूपम्) | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006 |

| | |
|---|---|
| Upload any additional information अतिरिक्ताः सूचना | View Document (https://assessmentonline.naac.gov.in/storage/app/hei/SSR/103006 |

***7.1.4 Waste Management steps including:***

***1. Solid waste management***

***2. Liquid waste management***

***3. E-waste management***

***व्यर्थवस्तुप्रबन्धनप्रक्रिया यथा***

***1. घनव्यर्थवस्तुप्रबन्धनम्***

